Entered
1.7.18

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1297.

PROVINCIAL MUSEUM REFERENCE LIBRARY

तीर्थचिन्तामणिः ।

वाचस्पतिमिश्रविरचितः ।

TIRTHACINTAMANI

OF

VĀCASPATI MISRA.



5083

EDITED BY

KAMALAKRISHNA SMRITITIRTHA.

FASCICULAS III.

Calcutta.

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
5, Nandakumar Chawdhury's 2nd Lane.

AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1911.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	As.
•Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
*Agni Purāṇa, Fasc. 6-14 @ /10/ each	5	10
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
Aitereya Lochana	2	0
•Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-	1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each	1	4
Atmatattaviveka, Fasc. I. @ /10/ each	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7; Vol. II. Fasc. 1-7 @ 1/ each	15	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-3 @ /10/ each	3	12
*Bhāmatī, Fasc. 4-8 @ /10/ each	3	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10 each	4	6
Baudhyostatrasangraha	2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çantideva, Fasc. 1-5 @ /10/ each	3	2
Cri Cantinatha Charita, Fasc. 1-3	1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-14 @ /10/ each	8	12
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc 1-6 @ /10/ each	36	14
Ditto Vol. 4, Fasc. 7-8, @ 1/4/ each	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/	1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each	3	12
Ditto Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc 1-4, Vol. III, Fasc. 1-4; Vol 4, Fasc 1 @ /10/ each	10	0
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each	1	14
Dāna Kriyā kaumudī, Fasc 1-2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Ācharasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol. I @ /10/ each	3	2
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
Karmapradiph, Fasc. I	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Kātantra, Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	17	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each	4	6
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each	3	0
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, fasc. 1 @ 1/4	1	4
Manuṭikā Sangraha, Fasc. 1-3 @ /10/ each	1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्माण्डपुराणे—

चिन्तामणिगणाच्चापि गङ्गायास्तोयबिन्दवः।
विशिष्टा यत्प्रयच्छन्ति भक्तेभ्योऽचिन्तितं[1] फलम्॥
गण्डूषमात्रतो भक्त्या सकृद्गङ्गाम्भसा नरः।
कामधेनुस्तनोद्भूतान् भुङ्क्ते दिव्यरसान्दिवि[2]॥
सर्व्वपापं निहत्येह रेजे गङ्गाजलोच्चितः।
अपहत्य तमस्तीव्रं भाति सूर्य्यो यथोदये॥
मनो-वाक्कायजैर्ग्रस्तः पापैर्बहुविधैरपि।
वीक्ष्य गङ्गां भवेत्पूतः पुरुषो नाऽत्र संशयः॥

तथा—

गङ्गातोयाभिषिक्तन्तु भक्ष्य[3]मश्नाति योगवित्।
सर्पवत्कञ्चुकं त्यक्त्वा पापहीनो नरोत्तमः।
स्वर्गापवर्गिकां सिद्धिं प्राप्नोत्येव न संशयः॥
तथा गङ्गाजलैर्दिग्धः[4] पवनः पुरुषं यदा।
स्पृशति सोऽपि पाप्मानं सर्व्वथै[5]वापवर्ज्जति॥

नारदीये—

हिमवद्विन्ध्यसदृशा राशयः पापकर्म्मणाम्।
गङ्गाम्भसा ते नश्यन्ति विष्णुभक्तिहतापदः[6]॥

---

(१) ग पुस्तके—भक्तेभ्यश्चिन्तितम्।
(२) ख पुस्तके—भुवि।
(३) ख पुस्तके—षिक्तान्तु भिक्षाम्।
(४) ख ग पुस्तकद्वये—गङ्गाया जलदिग्धोऽयम्।
(५) ख पुस्तके—सर्व्वमेव।
(६) ग पुस्तके—हता यथा।

State Museum Library Lucknow 5083

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भविष्यपुराणे—

प्रवेशमात्रे गङ्गायां स्नानार्थं भक्तितो नृणाम् ।
ब्रह्महत्यादयो दोषा हाहेत्युक्त्वा प्रयान्त्यलम् ॥

ब्रह्माण्डपुराणे—

गङ्गातीरे वसेन्नित्यं गङ्गातोयं पिबेत्सदा ॥

अथ गङ्गासेवनफलम् ।

तत्र स्कन्दपुराणे—

स एव देवैर्मर्त्यैश्च पूजनीयो महर्षिभिः ।
यो वै गङ्गां समाश्रित्य सुखं तिष्ठति निर्भयः ॥

तथा--

तिष्ठेदवाक्शिरा यस्तु वर्षाणामयुतं नरः ।
यः सेवते माससेकं गङ्गां स तु विशिष्यते ॥

नारदीये—

किमष्टाङ्गेन योगेन किं तपोभिः किमध्वरैः ।
वास एव हि गङ्गायां ब्रह्मज्ञानस्य कारणम् ॥

ब्राह्मे—

तिष्ठेद्युगसहस्रन्तु पादेनैकेन यः पुमान् ।
माससेकन्तु गङ्गायां समौ स्यातां न वा समौ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्माण्डे—

किं यज्ञैर्बहुवित्ताढ्यैः किं तपोभिश्च तापनैः ।
स्वर्ग-मोक्षप्रदा गङ्गा सुखसेव्या यतः स्थिता ॥
यज्ञैर्यमैश्च नियमैर्दानैः संन्यासतोऽपि वा ।
न तत्फलमवाप्नोति गङ्गां प्राप्य यदाप्नुयात् ॥
प्रभासे गोसहस्रेण राहुग्रस्ते दिवाकरे ।
यत्फलं लभते मर्त्यो गङ्गायां तद्दिने दिने ॥
अन्योपायांस्तु यस्त्यक्त्वा मोक्षकामः सुनिश्चितः ।
गङ्गातीरे सुखं तिष्ठेत् स वै मोक्षस्य भाजनम् ॥
वाराणस्यां विशेषेण गङ्गा सद्यस्तु मोक्षदा ॥
प्रतिमासं चतुर्द्दश्यामष्टम्याञ्चैव सर्व्वदा ।
पक्षयोरुभयोश्चैव सर्व्वपर्व्वसु सर्व्वदा ॥
गङ्गातीरनिवासश्च यावज्जीवप्रतिज्ञया ॥
यस्य सिध्यति धर्म्मात्मा स देवो नाऽत्र संशयः ।

भविष्ये—

[1]कृच्छ्रादिनियमान् कृत्वा नरो यत्फलमश्नुते ॥
सदा चान्द्रायणञ्चैव तल्लभेज्जाह्नवीतटे ॥
गङ्गासेवापरस्येह दिवसार्द्धेन यत्फलम् ।
न तच्छक्यं समत्वेन [2]प्राप्तुं क्रतुशतैरपि ॥
सर्व्वयज्ञ-तपो-दान-योग-स्वाध्यायकर्म्मभिः ।
यत्फलं तल्लभेद्भक्त्या गङ्गातीरे निवासतः ॥

---

(१) ग पुस्तके—कृच्छ्राऽतिकृच्छ्राणि सदा । (२) क ख पुस्तकद्वये—वक्तुम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्यवादिषु यत्पुण्यं नैष्ठिकब्रह्मचारिणाम् ।
यदग्निहोत्रिणां पुण्यं तत्तु गङ्गानिवासतः ॥

अथ गङ्गाभक्तिफलम् ।

तत्र ब्राह्मे—

स्वमातृ-पितृ-दाराणां कुलकोटीमनन्त(कं)रम् ।
गङ्गाभक्त(क्ति)स्तारयति संसारार्णवतो ध्रुवम् ॥
सन्तोषः परमैश्वर्य्यं तत्त्वज्ञानं सुखात्मना ।
विनयाचारसम्पत्तिर्गङ्गाभक्तस्य जायते ॥
कृतकृत्यो भवेन्मर्त्त्यो गङ्गां प्राप्यैव केवलम् ।
तद्भक्तस्तत्परश्च स्यात् मुक्त एव न संशयः ॥
भक्त्या तज्जलपङ्काशी तज्जलं सेवते च यः ।
अनायासेन हि नरो मोक्षोपायं स विन्दति ॥
दीक्षितः सर्व्वयज्ञेषु सोमपानं दिने दिने ॥
सर्व्वाणि येषां गाङ्गेयैस्तोयैः कृत्यानि देहिनाम् ।
देहं त्यक्त्वा नराः शैवे पदे तिष्ठन्ति सर्व्वदा ।

स्कन्दपुराणे—

तिष्ठेद्युगसहस्रन्तु पादेनैकेन यः सदा ।
यः संश्रयेद्यथेष्टन्तु गङ्गाम्भः स विशिष्यते ॥

महाभारते—

देवाः सोमार्कसंस्थानि यथा [1]मन्त्रादिभिर्मुखैः ।
अमृतान्युपभुञ्जन्ति तथा गङ्गाजलं नराः ॥

---

(१) ग पुस्तके—स्वतादिभिर्मखैः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ गङ्गातोयपानफलम् ।

तत्र भविष्यपुराणे—

कन्यादानैस्तथाऽन्यत्र भूमिदानैश्च भक्तितः ।
अन्नदानैश्च गोदानैः स्वर्णदानादिभिस्तथा ॥
रथाऽश्व-गजदानैश्च यत्पुण्यं परिकीर्त्तितम् ।
ततः शतगुणं पुण्यं गङ्गागण्डूषतो भवेत् ॥
चान्द्रायणसहस्राणां यत् फलं परिकीर्त्तितम् ।
ततोऽधिकफलं गङ्गातोयपानादवाप्यते ॥

स्कन्दपुराणे—

गण्डूषमात्रपानेन अश्वमेधफलं लभेत् ।
स्वच्छन्दं यः पिवेदम्भस्तस्य शक्तिः करे स्थिता ॥

तथा—

त्रिभिः सारस्वतं तोयं सप्तभिस्त्वथ यामुनम् ।
नार्म्मदं दशभिर्म्मासैर्गाङ्गं वर्षेण जीर्य्यति ।
[1]नाभ्यन्तर्गततोयानां मृतानां क्वापि देहिनाम् ।
तत्तत्तीर्थफलावाप्तिर्नाऽत्र कार्य्या विचारणा ॥

तथा—

चान्द्रायणसहस्रन्तु यश्चरेत् कायशोधनम् ।
यः पिवेत् तद् यथेष्टन्तु गङ्गाम्भः स विशिष्यते ॥

भविष्ये—

गङ्गां पश्यति संस्तौति स्नाति भक्त्या पिवेज्जलम् ।
स स्वर्गं ज्ञानममलं योगं मोक्षञ्च विन्दति ॥

(१) ख पुस्तके—अभ्यन्तर्गत—।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महाभारते—

यस्तु सूर्य्यांशुनिष्टप्तं गाङ्गेयं पिबते जलम्।
गवां निर्हारनिर्म्मुक्ताद्यावकात्तद्विशिष्यते॥

निर्हारो मैलम्। यावकः—[1]स्विन्नयवः।

अयमत्र प्रयोगः।

ॐ अद्य बहुकन्या-भूम्यन्न-गो-सुवर्ण-रथाश्व-गजदानजन्य पुण्य-शतगुणपुण्यप्राप्तिकामो गण्डूषमितगङ्गाजलपानमहं करिष्ये।

ॐ अद्य मोक्षकामः स्वच्छन्दं गङ्गाजलपानमहं करिष्ये।

ॐ अद्य गोनिर्हारनिर्म्मुक्तयवयावकप्राशनजन्य शुद्ध्यधिकशुद्धि-प्राप्तिकामः [2]सूर्य्यनिष्टप्तगङ्गाजलपानमहं करिष्ये।

अथ दर्शनम्।

तत्र महाभारते—

भवन्ति निर्व्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात्।
गङ्गाया दर्शनात्तद्वत् सर्व्वपापैः प्रमुच्यते॥
वाङ्मनः-कर्म्मजैर्ग्रस्तः पापैरपि पुमानिह।
वीक्ष्य गङ्गां भवेत् पूतस्तत्र मे नास्ति संशयः॥
सप्ताऽवरान् सप्तपरान् पितॄंस्तेभ्यश्च येऽपरे।
पुमांस्तारयते गङ्गां वीक्ष्य स्पृष्ट्वाऽवगाह्य च॥
दर्शनात् स्पर्शनात् पानात्तथा गङ्गेति कीर्त्तनात्।
[3]पुण्यं पुनाति पुरुषान् शतशोऽथ सहस्रशः॥

---

(१) ग पुस्तके—स्निग्ध-। (२) ग पुस्तके—सूर्य्यांशु—।
(३) ग—पुण्यान्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्माण्डे—

ज्ञानमैश्वर्य्यमायुश्च प्रतिष्ठा सर्व्वमान्यता ।
शुभानामाश्रयत्वञ्च गङ्गादर्शनजलं फलम् ॥
सर्व्वेन्द्रियाणां चापल्यं व्यसनासक्ति[1]राशु वै ।
निर्घृणत्वं नृणां गङ्गा-दर्शनादेव नश्यति ॥
परहिंसा च कौटिल्यं परदोषाद्यवेक्षणम् ।
दाम्भिकानां नृणां गङ्गा-दर्शनादेव नश्यति ॥

पाद्मे—

मुहुर्मुहुस्तथा पश्येत् स्पृशेद्वापि मुहुर्म्मुहुः ।
भक्त्या यदिच्छति नरः शाश्वतञ्चामृतं पदम् ॥

भविष्ये—

वापीकूपतड़ागादि-प्रपासत्रादिभिस्तथा ।
अन्यत्र यद्भवेत् पुण्यं तद्गङ्गादर्शनाद्भवेत् ॥

तथा—

यत् फलं जायते पुंसां दर्शने परमात्मनः ।
तद्भवेदेव गङ्गाया दर्शने भक्तिभावतः ॥

तथा—

नैमिषे च कुरुक्षेत्रे नर्म्मदायाञ्च पुष्करे ।
स्नानात् संसेवनाच्चापि यत्फलं लभते नरः ।
गङ्गाया दर्शनादेव कलौ प्राहुर्महर्षयः ॥

---

(१) क ख पुस्तकद्वये—वाग्भवम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अयमत्रप्रयोगः—

ॐ अद्य सर्व्वपापक्षयकामो गङ्गादर्शनमहं करिष्ये ।

ॐ अद्य वाङ्मनः कर्म्मजबहुपापक्षयकामो वा । एकविंशति-पुरुषतारणकामो वा । स्पर्शने अवगाहने च इदं फलम् ।

स्वीयशतसंख्यपुरुषपापक्षयकामो वा । स्पर्शने कीर्त्तनेऽपीदं फलम् ।

स्नानैश्वर्य्यायुः-प्रतिष्ठा-सर्व्वमान्यता-शुभाश्रयत्वकामो वा । वापी-कूप-तड़ाग-प्रपा-सत्रादिजन्यफल-प्राप्तिकामो वा । नैमिष-पुष्कर-कुरुक्षेत्र-नर्म्मदा स्नानसेवनजन्यफल-प्राप्तिकामो वा ।

ॐ अद्य परमात्मदर्शनजन्यफल-समफलप्राप्तिकामो वा भक्त्या गङ्गादर्शनमहं करिष्ये ।

अथ गङ्गास्मरणम् ।

तत्र ब्रह्मपुराणे—

अशुभैः कर्म्मभिर्युक्तान् मज्जमानान् भवार्णवे ।
पततो नरके गङ्गा संस्मृता हरते सदा ॥

मात्स्ये—

योजनानां सहस्रेषु गङ्गां स्मरति यो नरः ।
अपि दुष्कृतकर्म्माऽपि लभते परमां गतिम् ॥

भविष्ये—

स्मरणादेव गङ्गायाः पापसङ्घातपञ्जरम् ।
भेदं सहस्रधा याति गिरिर्व्वज्रहतो यथा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

गच्छंस्तिष्ठन् स्वपन् ध्यायन् जाग्रद्भुञ्जन् श्वसन् वदन् ।
यः स्मरेत् सततं गङ्गां स च मुच्येत बन्धनात् ॥
सहस्रयोजनस्थाश्च गङ्गां भक्त्या स्मरन्ति ये ।
तेऽप्यशेषैर्महापापैर्मुच्यन्ते नाऽत्र संशयः ॥
भवनानि विचित्राणि विचित्राभरणाः स्त्रियः ।
आरोग्यं वित्तसम्पत्तिर्गङ्गास्मरणजं फलम् ॥
(१)यैः पुण्यवाहिनी गङ्गा सकृद्भक्त्याऽवगाहिता ।
तेषां कुलानां लक्षन्तु भवात्तारयते शिवा ॥

ब्रह्माण्डे—

मनसा संस्मरेद्‌ यस्तु गङ्गां दूरस्थितो नरः ।
चान्द्रायणसहस्रन्तु लभते नाऽत्र संशयः ॥

अयमत्र प्रयोगः ।

ॐ अद्य नरकपाताभावकामो गङ्गास्मरणमहं करिष्ये—
परमगतिप्राप्तिकामो वा पापसङ्घातभेदकामो वा—
ॐ अद्याशेषमहापापविमुक्तिकामो वा ।
विचित्रबहुभवन-विचित्राभरण बहुस्त्र्यारोग्य वित्तसम्पत्तिकामो वा—चान्द्रायणसहस्रजन्यफलप्राप्तिकामो वा ।
ॐ अद्य पातकविमुक्तिकामो वा भक्त्या गङ्गास्मरणमहं करिष्ये ।
भक्त्या गङ्गा गङ्गेत्यभिधानेऽप्येतदेव फलम् ।
जागरे बहुधा गङ्गास्मरणे च विमुक्तिः (२)फलम् ॥

---

(१) क ख पुस्तकद्वये—अधिकमिदं पद्यम् । (२) ग पुस्तके—बन्धमुक्तिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ कीर्त्तनम् ।

तत्र विष्णुपुराणे—

गङ्गा गङ्गेति यन्नाम योजनानां शतैरपि ।
स्थितैरुच्चारितं हन्ति पापं जन्मत्रयाऽर्ज्जितम् ॥

गङ्गां प्रकृत्य-मात्स्ये—

कीर्त्तनान्मुच्यते पापात् दृष्ट्वा भद्राणि पश्यति ।
अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलम् ।

ब्रह्माण्डे—

[१]सप्तावरान् सप्त परान् सप्ताऽथ परतः परान् ।
गङ्गा तारयते पुंसां प्रसङ्गेणापि कीर्त्तिता ॥
अनिच्छयाऽपि गङ्गाया योऽसौ नामानुकीर्त्तनम् ।
करोति पुण्यवाहिन्याः सोऽपि स्वर्गस्य भाजनम् ॥

नारदीये—

सर्व्वावस्थां गतो वाऽपि सर्व्वधर्म्मविवर्ज्जितः ।
गङ्गायाः कीर्त्तनेनापि शुभां गतिमवाप्नुयात् ॥

अयमत्रप्रयोगः ।

ॐ अद्य जन्मत्रयार्ज्जितपापक्षयकामो गङ्गा-गङ्गेति कीर्त्तन-महं करिष्ये ।

एकविंशतिपुरुषतारणकामो वा । स्वर्गभागित्वकामो वा । शुभगतिप्राप्तिकामो वा ।

(१) ग पुस्तके—सप्तावरान् सप्ताऽथ परतः परतः परान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्पर्शनम् ।

तत्र गङ्गाऽधिकारे वाराहे—

ब्रह्महा गुरुहा गोघ्नः स्पृष्टो वा सर्व्वपातकैः ।
तस्यास्तोयैर्नरः स्पृष्टः सर्व्वपापैः प्रमुच्यते ॥

ॐ अद्य महापातकादिसकलपापक्षयकामो गङ्गास्पर्शनमहं करिष्ये ।

अथाऽभिलाषः ।

तत्र भविष्ये—

कदा वत्स्यामि[1] तां गङ्गां कदा स्नानं लभेमहि ।
इति पुंसाऽभिलषिता कुलानां तारयेच्छतम् ॥

ॐ अद्य कुलशततारणकामो गङ्गाभिलाषमहं करिष्ये ।

अथ स्नानम् ।

तत्र विष्णुपुराणे—

स्नातस्य सलिले यस्याः सद्यः पापं प्रणश्यति ।
अपूर्व्वपुण्यप्राप्तिश्च[2] सद्यो मैत्रेय जायते ॥

भारते—

स्नातानां शुचिभिस्तोयैर्गाङ्गेयैः प्रयतात्मनाम् ।
व्युष्टिर्भवति या पुंसां न सा क्रतुशतैरपि ॥

---

(१) ख—पुस्तके द्रक्ष्यामि । (२) ख पुस्तके पुण्यावाप्तिश्च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रयतः—एकादशेन्द्रियसंयतः । व्युष्टिः पुण्योपचयः ।

तथा—

अपहत्य तमस्तीव्रं यथा भात्युदये रविः ।
तथाऽपहत्य पाप्मानं भाति गङ्गाजलोच्चितः ॥

ब्रह्माण्डे—

एकेन स्नानमात्रेण विधिना भक्तिमान्नरः ।
अश्वमेधफलं सद्यो गङ्गायां प्राप्नुयाद् ध्रुवम् ॥

तथा—

अनेकजन्मसम्भूतं पुंसां पापं प्रणश्यति ।
स्नानमात्रेण गङ्गायां सद्यः स्यात् पुण्यभाजनम् ॥

तथा—

अन्यस्थानगतं पापं गङ्गातीरे विनश्यति ।
गङ्गातीरकृतं पापं गङ्गास्नानेन नश्यति ॥

तथा—

रात्रौ दिवा च सन्ध्यायां गङ्गायान्तु प्रयत्नतः ।
स्नात्वाऽश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥
सर्व्वतीर्थेषु यत्पुण्यं सर्व्वेष्वायतनेषु च ।
तत्फलं लभते सर्व्वं गङ्गास्नानान्न संशयः ॥

अत्र योगसिद्धिन्यायादन्यतमफलकामना अधिकारिविशेषण-मिति द्रष्टव्यम् ।

महापातकसंयुक्तो युक्तो वा सर्व्वपातकैः ।
गङ्गास्नानेन विधिना मुच्यते सर्व्वपातकैः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गङ्गास्नानात् परं स्नानं न भूतं न भविष्यति ।

महापातकं जन्मान्तरीयं न त्वैहिकम् । अन्यथाऽनधिकारापत्तेः ।

विशेषतः कलियुगे पापं हरति जाह्नवी ।

तथा—

निहत्य कामजान् दोषान् काय-वाक्-चित्तसम्भवान् ।
समा-स्नानेन भक्त्या तु मोदते दिवि देववत् ॥

समा वर्षम् ।

षण्मासं स्नाति गङ्गायां नैरन्तर्य्येण यो नरः ।
समस्तपापनिर्म्मुक्तः समस्तकुलसंयुतः ॥
समस्तभोगसंयुक्तो विष्णुलोके महीयते ।
परार्द्धद्वितयं यावन्नाऽत्र कार्य्या विचारणा ॥

तथा—

गङ्गायां स्नाति यो मर्त्त्यो यावज्जीवन्तु नित्यशः ।
जीवन्मुक्तः स चाऽत्रैव देहान्ते मुक्त एव सः ॥

तथा—

प्रातःस्नानाद्दशगुणं पुण्यं मध्यन्दिने तथा ।
सायंकाले शतगुणमनन्तं शिवसन्निधौ ।

भविष्ये—

कपिलाकोटिदानात्तु गङ्गास्नानं विशिष्यते ।

मात्स्ये—

कुरुक्षेत्रसमा गङ्गा यत्र तत्राऽवगाहिता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आग्नेये सूर्य्यवाक्यम्—

ये मदीयांशुसन्तप्ते जले स्नानादिकां क्रियाम् ।
करिष्यन्तीह यास्यन्ति भित्वा ते मम मण्डलम् ॥

तथा—

यो गृहे वर्त्तमानोऽपि त्वां स्नाने कीर्त्तयिष्यति ।
स यास्यति दिवं नित्यमित्याह वरुणस्य ताम् ॥

अथैतत्प्रयोगः ।

ॐ अद्य सद्यः पापप्रणाश-सद्योऽपूर्व्वपुण्यप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

कुरुक्षेत्रस्नानजन्यफल-समफलप्राप्तिकामो वा । प्रयतस्य तु क्रतुशतजन्यव्युष्ट्यतिशयितव्युष्टिकामो वा । पापविघातपूर्व्वक-भासमानत्वकामो वा ।

ॐ अद्याश्वमेधफलप्राप्तिकामो भक्त्या वैध-गङ्गास्नानमहं करिष्ये ।

रात्रौ सन्ध्यायां तथोद्धृतगङ्गाजलेन गृहेऽपि स्नाने अश्व-मेधफलमेव ।

सर्व्वतीर्थ–सर्व्वायतनजन्य–पुण्याऽन्यतम–पुण्यप्राप्तिकामो वा गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य सर्व्वपातकविमुक्तिकामो विधिना गङ्गास्नानमहं करिष्ये । गङ्गातीरकृत-पापनाशकामो वा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कपिलाकोटिदानजन्यफलाधिकफलप्राप्तिकामो वा।

ॐ अद्य सूर्य्यमण्डलभेदपूर्व्वक गमनकामः सूर्य्यांशुसन्तप्तगङ्गा-जलस्नानमहं करिष्ये।

ॐ समस्तपापविनिर्म्मुक्त-समस्त-कुलसंयुक्त-समस्तभोगसंयुक्ता-त्मीयपरार्द्धद्वितयावच्छिन्नविष्णुलोकमहितत्वकामो अद्यादि-षण्मा-सान् गङ्गायां स्नानमहं करिष्ये।

ॐ कायवाक्-चित्तसम्भवकामजदोषनिहननपूर्व्वकस्वर्गलोका-धिकरणकदेववन्मोदमानत्वकामोऽद्यादि भक्त्या वर्षं गङ्गायां स्नान-महं करिष्ये।

ॐ अद्य प्रातःकालीन गङ्गास्नानजन्यफल-दशगुणफलप्राप्ति कामो मध्याह्ने गङ्गायां स्नानमहं करिष्ये।

ॐ अद्य प्रातःकालीन गङ्गास्नानजन्यशतगुणफलप्राप्तिकामः सायंकाले गङ्गायां स्नानमहं करिष्ये।

ॐ अद्य गङ्गास्नानजन्यानन्तफलकामः शिवसन्निधौ गङ्गा-स्नानमहं करिष्ये।

ॐ ऐहिकजीवन्मुक्तत्व-देहान्तकालिकमुक्तत्वकामो अद्यादि यावज्जीवं गङ्गायां स्नानमहं करिष्ये।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ कालविशेषे स्नानम् ।

तत्र ब्रह्माण्डपुराणे—

नैरन्तर्य्येण गङ्गायां माघे[1] यः स्नाति मानवः ।
स शक्रलोकेषु चिरं कालं स्थित्वा सगोत्रजः ।
ततो ब्रह्मपुरे तिष्ठेत् कल्पकोटिशतायुतम् ॥

अत्र च सौरमासपरिग्रहः शिष्टाचारात् ।

भविष्ये—

नैरन्तर्य्येण विधिना गङ्गायां स्नाति यो नरः ।
षण्मासमेकस्त्वपरः सकृदेवोत्तरायणे ॥
तयोः समं भवेत् पुण्यं विषुवेषु तथैव च ।
संक्रान्तिषु च सर्व्वासु चातुर्म्मास्यफलं लभेत् ॥
एतदेव भवेत् पुण्यं माघ-कार्त्तिकमासयोः ।
संवत्सरफलन्तु स्यात् नवम्यां कार्त्तिके तथा ॥

इयञ्च शुक्ला प्राथम्यात् ।

मन्वादौ च युगादौ च मासत्रयफलं लभेत् ।
द्वादश्यां श्रवणर्क्षे च अष्टम्यां पुष्ययोगतः ॥
आर्द्रायाञ्च चतुर्द्दश्यां गङ्गास्नानं सुदुर्लभम् ।
वैशाखे वै पौर्णमास्यां माघे वै कार्त्तिके तथा ॥
तथा माघी त्वमावास्या गङ्गायामतिदुर्लभा ।
कृष्णाष्टम्यां सहस्रन्तु शतं स्यात् सर्व्वपर्व्वसु ।
अष्टमी चेयं माघस्य तत्सन्दंशात् ॥

---

(१) ग पुस्तके—मासम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्रापि कृष्णा शिष्टपरिग्रहात् । तत्रैव—

अमावस्यां शतगुणं सहस्रन्तु दिनक्षये ।
सोम-सूर्य्यग्रहे लक्षं व्यतीपाते त्वनन्तकम् ॥

सूर्य्याचन्द्रमसोः संक्रान्तिसाम्यं व्यतीपात इति कल्पतरुः ।

मासत्रयफलन्तु स्यात् फाल्गुनाषाढ़मासयोः ।
जन्मर्क्षे तु कृते स्नाने गङ्गायां भक्तिभावतः ।
जन्मप्रभृतिपापौघं सञ्चितं नश्यति क्षणात् ॥

तथा भविष्ये—

चतुर्द्दश्यां यदा योगो व्यतीपातेन चार्द्रया ।
तदा पुण्यतमः कालो देवानामपि दुर्लभः ॥
तदा यः स्नाति गङ्गायां भक्त्या तत्फलमाप्नुयात् ।
यत्र तत्र विपन्नोऽपि गङ्गामरणजन्तु तत् ॥
कृष्णाष्टम्यां यदार्द्रा स्याद्[१] व्यतीपातश्च वै तदा ।
गङ्गायां दुर्लभं स्नानं स योगो ह्यतिदुर्लभः ॥
यो माघे दैवयोगेन सदा स्नानं विधानवित् ।
लभते दैवयोगेन जातिं स्मरति पौर्व्विकीम् ॥
सर्व्वयज्ञ-तपो-दान-फलमाप्नोति तत्क्षणात् ।
सर्व्वशास्त्रार्थविज्ञातो ह्यरोगश्च तदा भवेत् ॥

तथा—

संक्रान्त्यां पक्षयोरन्ते ग्रहणे चन्द्र-सूर्य्ययोः ।
[२]गङ्गास्नातो नरः कामाद्ब्रह्मणः सदनं व्रजेत् ॥

---

(१) ग पुस्तके—यदा चार्द्रा । (२) ख पुस्तके—गङ्गां स्नातः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्माण्डे--

चन्द्र-सूर्य्यग्रहे चैव योऽवगाहेत जाह्नवीम् ।
स स्नातः सर्व्वतीर्थेषु किमर्थमटते महीम् ॥

स्मृतिः--

इन्दोर्लक्षगुणं प्रोक्तं रवेर्दशगुणं स्मृतम् ।
गङ्गातीरे तु सम्प्राप्ते इन्दोः कोटी रवेर्दश ॥

तथा स्कान्दे—

गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
तत्फलं जाह्नवीस्नाने राहुग्रस्ते निशाकरे ॥
दिवाकरे पुनस्तद्वत् शतसंख्यमुदाहृतम् ।
वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ॥
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ।

शङ्खः—

वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ।
गङ्गातोये नरः स्नात्वा मुच्यते सर्व्वकिल्बिषैः ॥
ज्यैष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्याम्
हस्ते शैलान्निरगमदियं जाह्नवी मर्त्त्यलोकम् ।
पापान्यस्यां हरति च तिथौ सा दशेत्याहुरार्य्याः
पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य ॥

ब्रह्माण्डे—

संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्र-सूर्य्ययोः ।
पुष्ये स्नात्वा तु गङ्गायां कुलकोटीः समुद्धरेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यतीपातः सूर्य्याचन्द्रमसोः क्रान्तिसाम्यमिति कल्पतरुः ॥ श्रवणाश्विधनिष्ठार्द्राश्लेषामृगशिरोऽन्यतमयुता रविवारामावास्या इति तु केचित्—

तदाह वृहन्मनुः—

श्रवणाश्वि-धनिष्ठार्द्रा नागदैवत-मस्तके ।
यद्यमा रविवारेण व्यतीपातः स उच्यते ॥

यमः—

वैशाखशुक्लपक्षे तु तृतीयायां विशेषतः[१] ।
गङ्गातोये नरः स्नात्वा मुच्यते सर्व्वकिल्बिषैः ॥

पद्मपुराणे—

महापातकसंज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि ॥

गोविन्दद्वादशी—फाल्गुनशुक्लद्वादशी ।

ब्रह्माण्डे—

प्रतिमासे चतुर्द्दश्यामष्टम्याञ्चैव सर्व्वदा ।
पक्षयोरुभयोश्चैव सर्व्वपर्व्वसु जाह्नवीम् ॥
भागीरथीं विशेषेण [२]तीर्थान्यायतनानि च ।
समायान्ति विशेषेण सर्व्वपापहराणि च ॥
आत्मनो जन्मनक्षत्रे गङ्गातोयेषु भक्तितः ।
नरः स्नात्वा तु गङ्गायां कुलं सर्व्वं समुद्धरेत् ॥

---

(१) मूल पुस्तके—तिथौ सकृत् ।

(२) क घ पुस्तकद्वये—तथाऽन्यायतनानि च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

माससंज्ञेन ऋक्षेण[1] चन्द्रः सम्पूर्णमण्डलः ।
गुरुणा याति संयोगं तन्महत्त्वं तिथिः स्मृतम् ॥
महाज्यैष्ठी सुरश्रेष्ठ ख्याताऽनन्तफला स्मृता ।
तस्यान्तु जाह्नवीस्नानं सूर्य्यग्रहशताधिकम्[2] ॥

स्मृतिः—

अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समाः ॥

अत्रैतद्वाक्ययोः सूर्य्यग्रहणफलं स्नानजमेव। स्नानमपि च गाङ्गमेव सन्निहिते बुद्धिरन्तरङ्गेति न्यायात् ।

तेन सूर्य्यग्रहणकालीनगङ्गास्नानस्यैव फलमिह शतगुणादि-रूपं भवतीत्यर्थः ।

अथायमत्रप्रयोगः—

ॐ शक्रलोकाधिकरणक-गोत्रजसहित सुचिरकालस्थिति-पूर्व्वककल्पकोटिशतायुतावच्छिन्नब्रह्मपुरवासकामोऽद्यादि माघं गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्योत्तरायणरविसंक्रान्तौ वैधनिरन्तरषण्मासावच्छिन्न-गङ्गास्नानजन्यपुण्य-समपुण्यप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये । विषुवयोरप्येवम् ।

---

(१) घ पुस्तके—संज्ञे यदा ऋक्षे ।

(२) ख पुस्तके—सूर्य्यग्रहणभाविकम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दक्षिणायन-विष्णुपदी-षड़शीतिषु नवसु ॐ अद्यामुकसंक्रान्तौ वैधनिरन्तरमासचतुष्टयावच्छिन्नगङ्गास्नानजन्यफल-समफलप्राप्ति-कामो गङ्गायां स्नानमहं करिष्ये ।

समस्तमाघस्नाने समस्तकार्त्तिकस्नानेऽप्येवम् ।

अक्षयनवम्यां—ॐ अद्य कार्त्तिकनवम्यां वैधनिरन्तरसंवत्सरा-वच्छिन्न गङ्गास्नानजन्यफल-समफलप्राप्तिकामो गङ्गायां स्नान-महं करिष्ये ।

ॐ अद्य मन्वादौ वैध निरन्तरमासत्रयावच्छिन्नगङ्गास्नान जन्यफल-समफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

युगादिष्वप्येवम् ।

श्रवणयुतद्वादश्यां, पुष्ययुताष्टम्यां, वैशाख्यां, माघ्यां, कार्त्तिक्यां माघामावस्यायाञ्च गङ्गास्नानमतिदुर्लभम् ।

अतिदुर्लभत्वन्तु सहस्रगुणाधिकत्वम् । कालान्तरे सहस्रगुण-मेतेष्वतिदुर्लभमित्यभिधानेन तथैव प्रतीतिः ।

तथाच—

ॐ अद्य श्रवणयुक्तद्वादश्यां गङ्गास्नानजन्यफलसहस्रगुणाधिक-फलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

एवमेवाष्टम्यादिषु षट्स्वपि द्रष्टव्यम् ।

ॐ अद्य माघकृष्णाष्टम्यां गङ्गास्नानजन्यफल-सहस्रगुणफल-प्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य पर्व्वणि गङ्गास्नानजन्यफल-शतगुणफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

5083

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ अद्य दिनक्षये गङ्गास्नानजन्यफल-सहस्रगुणफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य सूर्य्यग्रहे गङ्गास्नानजन्यफल-लक्षगुणफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

सोमग्रहेऽप्येवम् ।

[1][ॐ अद्य व्यतीपाते अनन्तगङ्गास्नानजन्यफल-समफलप्राप्ति कामो गङ्गायां स्नानमहं करिष्ये ।]

ॐ वैधनिरन्तरमासत्रयावच्छिन्नगङ्गास्नानजन्यफलप्राप्तिकामो अद्यादि फाल्गुनं गङ्गास्नानमहं करिष्ये ।

आषाढ़ेऽप्येवम् ।

ॐ अद्य जन्मप्रभृतिसञ्चितपापौघनाशकामो गङ्गायां स्नानमहं करिष्ये । सर्व्वकुलसमुद्धरणकामो वा ।

ॐ अद्य व्यतीपाताद्र्द्रायुतायां चतुर्द्दश्यां गङ्गामरणजन्यफल-समफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य माघे कृष्णाष्टम्याम् आर्द्राव्यतीपातयुक्तायां जातिस्मरत्व-सर्व्वयज्ञ-तपो-दानजन्यफल-समफलप्राप्ति-सर्व्वशास्त्रविदरोगित्वकामो गङ्गायां स्नाहमहं करिष्ये ।

ॐ अद्य संक्रान्त्यां(न्तौ) ब्रह्मसदन गमनकामो गङ्गायां स्नानमहं करिष्ये । एवमेवामावास्यायां, पौर्णमास्यां चन्द्रग्रहे, सूर्य्यग्रहे च फलम् । अद्य सूर्य्यग्रहे सर्व्वतीर्थस्नानजन्यफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये । चन्द्रग्रहेऽप्येवम् ।

---

(१) ख पुस्तके—[ ] चिह्नितांशः पतितः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ अद्य राहुग्रस्ते दिवाकरे दशकोटिगुणगङ्गास्नानजन्य-फल-समफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अस्यां रात्रौ राहुग्रस्ते निशाकरे सम्यग्दत्त गोकोटि-सहस्रजन्यफल-समफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य राहुग्रस्ते दिवाकरे सम्यग्दत्तगोकोटिसहस्रजन्य फल-शतगुणफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य चैत्रकृष्णत्रयोदश्यां वारुणनक्षत्रयुतायां शतसूर्य्य-ग्रहणकालीनगङ्गास्नानजन्यफल-समफलप्राप्तिकामो गङ्गायां स्नान-महं करिष्ये ।

ॐ अद्य वैशाखशुक्लतृतीयायां सर्व्वकिल्विषविमुक्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य ज्यैष्ठशुक्लदशम्यां क्षितिसुतहस्तनक्षत्रयुतायां दशविध-पापनाश--वाजिमेधायुतजन्यपुण्य-शतगुणपुण्यप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य संक्रान्त्यां(न्तौ) बहुकुलकोटिसमुद्धरणकामो गङ्गायां स्नानमहं करिष्ये ।

एवमेव व्यतीपात-पुष्य-चन्द्रग्रह-सूर्य्यग्रहेष्वपि वाक्यम् ।

ॐ अद्य महाज्यैष्ठ्यां शतसूर्य्यग्रहणकालीनगङ्गास्नानजन्य-फलाधिकफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य माघशुक्लसप्तम्यां सूर्य्यग्रहकालीनशतगङ्गास्नानजन्य-फल-समफलप्राप्तिकामो गङ्गायां स्नानमहं करिष्ये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ देशविशेषे स्नानम्।

तत्र पद्मपुराणे--

कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता।
कुरुक्षेत्राद्दशगुणा यत्र विन्ध्येन सङ्गता॥
विन्ध्याच्छतगुणा प्रोक्ता का(शि)शीपुर्य्यान्तु जाह्नवी।
विन्ध्यसङ्गमश्च कर्णतीर्थादौ।

तथा—

सर्व्वत्र[1] सुलभा गङ्गा त्रिषु स्थानेषु दुर्ल्लभा।
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे॥
तेषु स्नाता[2] दिवं यान्ति ये मृतास्तेऽपुनर्भवाः।

मात्स्ये—

कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता।
कुरुक्षेत्राद्दशगुणा यत्र विन्ध्येन सङ्गता॥
ततः शतगुणा प्रोक्ता यत्र पश्चिमवाहिनी।
[3]तस्मात् सहस्रगुणिता यत्र चोत्तरवाहिनी॥
[4]तस्मात् सहस्रगुणिता यत्र चोभयवाहिनी।

भविष्ये—

गङ्गाद्वारे कुशावर्त्ते स्नाने पुण्यफलं शृणु।
समानां राजसूयानां फलं स्यादश्वमेधयोः॥

---

(१) क ख पुस्तकद्वये—सर्व्वत्र दुर्ल्लभा गङ्गा त्रिषु स्थाने विशेषतः।
(२) ग पुस्तके—स्नात्वा। (३) ख पुस्तके—पद्यमिदं नास्ति।
(४) ग पुस्तके—पद्यमिदमधिकम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उषित्वा तत्र मासार्द्धं षण्णां विश्वजितां फलम् ।
दशायुतगवां दानपुण्यञ्च लभते नरः ॥
सुरोत्तमञ्च गोविन्दं रुद्रं कणखले स्थितम् ।
स्नात्वा वाप्य च गङ्गायां पुण्यमक्षयमाप्नुयात् ॥

महाभारते—

तीर्थञ्च शौकरं नाम महापुण्यं मुने शृणु ।
यस्मिन्नाविरभूत् पूर्व्वं वराहाकृतिरच्युतः ॥
शतमग्निचितां पुण्यं ज्योतिष्टोमद्वयस्य च ।
अग्निष्टोमसहस्रस्य फलमवाप्नुयान्नरः ॥
तत्रैव ब्रह्मणस्तीर्थं ज्योतिष्टोमायुतस्य च ।
अश्वमेधत्रयस्यापि स्नातस्तत्र फलं लभेत् ॥

तथा—

कुब्जाख्यं तीर्थमनघं यत्र च व्याधयोऽखिलाः ।
नश्यन्ति सर्व्वजन्मोत्थं स्यान्नष्टं पातकं नृणाम् ॥
अथाहुः कापिलं तीर्थं कपिला धेनवोऽन्वहम् ।
दत्ता येनायुतान्यष्टौ स्नात्वा तुल्यं[1] फलं लभेत् ॥
गङ्गाद्वारे कुशावर्त्ते विल्वके नीलपर्व्वते ।
तीर्थे कणखले स्नात्वा धूतपापो दिवं व्रजेत् ॥

काशीमभिधाय तथैव ।

पवित्राख्यं ततस्तीर्थं सर्व्वतीर्थात् पवित्रकम् ।
द्वयोर्व्विश्वजितोस्तत्र स्नानात् पुण्यं लभेन्नरः ॥

(१) क ख पुस्तकद्वये—तस्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वेणीवाह्यं ततस्तीर्थं सरयूर्यत्र गङ्गया ।
सुपुण्यया महापुण्या स्वसा स्वस्रेव सङ्गता ॥
हरेर्दक्षिणपादाब्जक्षालनादमरापगा ।
वामपादोदकं विद्धि सरयूं मानसोद्भवाम् ॥
तीर्थे तत्रार्चयन्नुद्रं विष्णुं विष्णुत्वमाप्तवान् ।
पञ्चाश्वमेधफलदं स्नानं तस्मिन्नघापहम् ॥

वेणीवाह्यं दहरीति प्रसिद्धम् ॥

ततस्तु गाण्डकं तीर्थं गण्डकी यत्र सङ्गता ।
गोसहस्रस्य दानञ्च तत्र स्नानेन सम्मितम् ॥
[1]रामतीर्थं ततः पुण्यं वैकुण्ठो यत्र सन्निधौ ॥
सोमतीर्थं ततः पुण्यं यत्रासौ मुद्गलो मुनिः ।
समभ्यर्च्च्य शिवं ध्यायन् गणतान्तु समाययौ ॥
चम्पकाख्यं पुण्यतीर्थं यत्र गङ्गोत्तरवाहिनी ।
[2]मणिकर्णिकावद्विज्ञेया महापातकनाशिनी ॥
कलसाख्यं ततस्तीर्थं कलसादुत्थितो मुनिः ।
अगस्त्यः पूजयन् यत्र रुद्रं मुनिवरोऽभवत् ॥
सोमद्वीपं महापुण्यं तीर्थं वाराणसीसमम् ।
सोमो यत्रार्चयन्नीशं रुद्रेण शिरसा धृतः ॥
विश्वामित्रस्य भगिनी गङ्गया यत्र सङ्गता ।
तत्राप्लुत्य च त्वचारेः सम्मतस्तु प्रियातिथिः ॥

---

(१) ग पुस्तके नास्ति ।

(२) ग पुस्तके—मणिकर्णिका तु सा ज्ञेया ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जह्नुह्रदे महातीर्थे स्नानं यत्र शरीरिणाम् ।
एकविंशतिसन्तानतारकं किमतःपरम् ॥

जह्नुह्रद एकशाखानगरे गङ्गायाम् ।

तस्माददितितीर्थञ्च यत्र [1]तप्त्वाऽदितिर्हरिम् ।
कश्यपात्तनयं लेभे तत्र स्नानं महोदयम् ॥
शिलोच्चयं महातीर्थं तत्र तप्त्वा तपः प्रजाः ।
तृणादिभिः सह स्वर्गं यान्ति तीर्थगुणाश्रयात् ॥
इन्द्राणी नाम तीर्थं स्यात् इन्द्राणी यत्र वासवम् ।
तपस्तप्त्वा पतिं लेभे स्नानादत्र प्रयागवत् ॥
पुण्यमाम्रातकं तीर्थं विश्वामित्रस्तपश्चरन् ।
यत्र ब्रह्मर्षितां लेभे क्षत्रियस्तीर्थसेवया ॥
प्रद्युम्नतीर्थं तपसा यत्र स्वेन स्मरो हरेः ।
प्रद्युम्ननामा पुत्रोऽभूत् स्थाने तत्र महोदयः ॥
तद्दक्षिणप्रयागस्तु गङ्गातो यमुना गता ।
स्नानात्तत्राक्षयं पुण्यं प्रयाग इव लभ्यते ॥

दक्षिणप्रयागस्तु मुक्तवेणी सप्तग्राम इति प्रसिद्धः ।

गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
स्नात्वैव ब्रह्मणो विष्णोः शिवस्य च पुरं व्रजेत् ॥

महाभारते—

गङ्गायास्त्वथ राजेन्द्र सागरस्य च सङ्गमे ।
अश्वमेधाद्दशगुणं प्रवदन्ति मनीषिणः ॥

---

(१) क ख पुस्तकद्वये—यत्र वाप्यादितिर्हरिम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथायमत्र प्रयोगः—

ॐ अद्य कुरुक्षेत्रस्नानजन्यफल-दशगुणफलप्राप्तिकामो विन्ध्य-सङ्गतगङ्गायां स्नानमहं करिष्ये ।

ॐ अद्य विन्ध्यसङ्गतगङ्गास्नानजन्यफल-शतगुणफलप्राप्तिकामः काश्यां गङ्गायां स्नानमहं करिष्ये ।

पश्चिमवाहिन्यामपि एतदेव फलम् ।

ॐ अद्य पश्चिमवाहिनीगङ्गास्नानजन्यफलसहस्रगुणफलप्राप्ति-काम उत्तरवाहिन्यां गङ्गायां स्नानमहं करिष्ये ।

ॐ राजसूयसप्तकाश्वमेधद्वयजन्यफल-समफलप्राप्तिकामो गङ्गा-द्वारे गङ्गायां स्नानमहं करिष्ये ।

कुशावर्त्तेप्येवम् ।

ॐ अद्याक्षयपुण्यकामः कणखले स्नात्वा तत्रस्थसुरोत्तम-गोविन्द-रुद्रपूजनमहं करिष्ये ।

ॐ अद्याग्निचिच्छत-ज्योतिष्टोमद्वयपुण्यसमपुण्याग्निष्टोम-सहस्रजन्यफलसमफलप्राप्तिकामः शौकरतीर्थे गङ्गायां स्नानमहं करिष्ये । अत्रैव ब्रह्मतीर्थस्नानि—

ॐ अद्य ज्योतिष्टोमायुताश्वमेधत्रयजन्यफलसमफलप्राप्ति-कामो ब्रह्मतीर्थे स्नानमहं करिष्ये ।

ॐ अद्याखिलव्याधि-सर्व्वजन्मोत्थपातकनाशकामः कुब्जाख्य-तीर्थे स्नानमहं करिष्ये ।

ॐ अद्य स्वदत्तकपिलधेन्वयुताष्टकजन्यफलसमफलप्राप्तिकामः कपिलतीर्थे स्नानमहं करिष्ये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ अद्य धूतपापस्त्रीयस्वर्लोकगमनकामो गङ्गाद्वारे स्नानमहं करिष्ये।

ॐ एतदेव कुशावर्त्ते विल्वके नीलपर्व्वते कणखले च स्नानफलम्।

ॐ अद्य विश्वजिद्वयजन्यपुण्य-समपुण्यप्राप्तिकामः पवित्राख्यतीर्थे स्नानमहं करिष्ये।

ॐ अद्य पञ्चाश्वमेधयज्ञजन्यफल समफलप्राप्ति-पापनाशनकामः सरयूसङ्गतगङ्गायां स्नानमहं करिष्ये।

ॐ अद्य गोसहस्रदानजन्यफल-समफलप्राप्तिकामो गण्डकीसङ्गतगङ्गायां स्नानमहं करिष्ये।

ॐ अद्य महापातकनाशकामः चम्पकाख्यतीर्थे उत्तरवाहिन्यां गङ्गायां स्नानमहं करिष्ये।

ॐ अद्य हृत्वारिसम्मतप्रियातिथित्वकामः कौशिकीसङ्गतगङ्गायां स्नानमहं करिष्ये।

ॐ अद्य एकविंशतिसन्ततिसन्तारणकामो जह्नुह्रदे स्नानमहं करिष्ये।

ॐ अद्य महोदयकामोऽदितितीर्थे स्नानमहं करिष्ये।

ॐ अद्याक्षयपुण्यप्राप्तिकामो दक्षिणप्रयागे स्नानमहं करिष्ये।

ॐ अद्य शिवपुरगमनकामो गङ्गासागरसङ्गमे स्नानमहं करिष्ये।

ॐ अद्याश्वमेधयज्ञजन्यफल-दशगुणफलप्राप्तिकामो गङ्गासागरसङ्गमे स्नानमहं करिष्ये। इति वा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथावगाहनम् ।

ब्रह्माण्डे—

यैः पुण्यवाहिनी गङ्गा सकृद्भक्त्याऽवगाहिता ।
तेषां कुलानां लक्षन्तु भवात्तारयते शिवा ॥

ॐ अद्य भवापादनकस्वकीयकुललक्षतारणकामो गङ्गावगाहनमहं करिष्ये ।

अथ सन्ध्या ।

गङ्गायाम् सन्ध्यामुपक्रम्य पौलस्त्यः—

गङ्गायां शतसाहस्रीति ।

ॐ अद्य सन्ध्यावन्दनजन्यफल-लक्षगुणफलप्राप्तिकामो गङ्गायां सन्ध्यावन्दनमहं करिष्ये ।

अथ तर्पणम् ।

तत्र विष्णुपुराणे—

'दत्ताः पितृभ्यो यत्रापस्तनयैः श्रद्धयान्वितैः ।
अक्षयान्तु प्रयच्छन्ति तृप्तिं मैत्रेय दुर्लभाम् ॥

भविष्ये—

यावन्तस्तु तिला मर्त्त्यैर्गृहीताः पितृकर्म्मणि ।
तावद्वर्षसहस्राणि पितरः स्वर्गवासिनः ॥

---

(१) क ख पुस्तकद्वये पिण्डाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पितरः पितृलोकवासिनः ।

भारते—

त्रिषु लोकेषु ये केचित् प्राणिनः सर्व्वे एव ते ।
तर्प्यमाणाः परां तृप्तिं यान्ति गङ्गाजलैः शुभैः ॥
य इच्छेत् सफलं जन्म जीवितं शुभमेव च ।
स पितृंस्तर्पयेद्गङ्गामभिगम्य सुरांस्तथा ॥

भविष्ये—

पतितादीनभिधाय ।

ये नरा दुःखिताः सम्यक् सर्व्वे ते सकुशैस्तिलैः ।
तर्पिता जाह्नवीतोयैर्नरेण विधिना सकृत् ॥
प्रयान्ति स्वर्गलोकन्तु नात्र कार्य्या विचारणा ।
स्वर्गसंस्थाश्च ये केचित् पितरः पुण्यशालिनः ॥
गङ्गाजलैस्तथा पुंसा विधिना तर्पिताः सकृत् ।
तेऽपि मोक्षं प्रपद्यन्ते यदि ब्रह्माऽब्रवीद्वचः ॥

तथा—

मासतर्पणमात्रेण पिण्डानां पातनेन च ॥
गङ्गायां पितरः सर्व्वे विमानान् सूर्य्यवर्च्चसः ।
अप्सरोगणसंयुक्तान् हेमरत्नविभूषितान् ।
मुक्ताजालपरिच्छन्नान् वेणुवीणानिनादितान् ।
भेरीशङ्खमृदङ्गादिनिर्घोषान् स्रग्विभूषितान् ॥
गन्धर्व्वगेयरुचिरान् दिव्यभोगसमन्वितान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गङ्गातर्पणसम्प्रीताः[१] श्राद्धपिण्डसुतर्पिताः ।
आरुह्य सहसा यान्ति ब्रह्मलोकं सनातनम् ॥

अथ प्रयोगः ।

ॐ अद्य तर्पणतिलसंख्यबहुवर्षसहस्रावच्छिन्न तर्पणीयपितृस्वर्गवासकामः सतिलगङ्गाजलेन पितृतर्पणमहं करिष्ये ।

ॐ अद्याक्षयपितृतृप्तिकामो गङ्गाजलेन पितृतर्पणमहं करिष्ये ।

ॐ अद्य जन्मसाफल्य—जीवितशुभप्राप्तिकामो गङ्गाजलेन पितृतर्पणमहं करिष्ये ।

ॐ अद्य नरकस्थपितृस्वर्गप्राप्ति—स्वर्गस्थपितृमोक्षप्राप्तिकामः सतिलगङ्गाजलेन पितृतर्पणमहं करिष्ये ।

ॐ सूर्य्यवर्च्चोऽप्सरोगणसंयुक्त-हेमरत्नविभूषित-मुक्ताजाल-परिच्छन्न-वेणुवीणानिनादित-भेरीशङ्खमृदङ्गादिनिर्घोषि स्रग्विभूषितगन्धर्व्वगेय-रुचिरदिव्यभोगसमन्वित-बहुविमानारोहणपूर्व्वक-तर्पणीयपितृगणकर्त्तृकब्रह्मलोकगमनकामोऽद्यादि-मासं गङ्गाजलेन पितृतर्पणमहं करिष्ये ।

मासं पिण्डदानेऽप्येवम् ।

इदन्तु जलोपकण्ठे चेत् पिण्डपितृयज्ञरीत्या कर्त्तव्यम् ।

---

(१) ग पुस्तके सुप्रीताः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ शिवार्च्चनम्।

तत्र स्मृतिः—

गङ्गायान्तु नरः स्नात्वा यो लिङ्गं नित्यमर्च्चयेत्।
एकेन जन्मना मोक्षं परमाप्नोति स ध्रुवम्॥

तथा—

अग्निहोत्राणि [1]वेदाश्च यज्ञाश्च बहुदक्षिणाः।
गङ्गायां लिङ्गपूजायाः कोव्यंशेनापि नो समाः॥

तथा—

[[2]गङ्गामज्जनशीलस्तु गङ्गातीरे विशेषतः—]
प्रह्लादं निर्वृतिं स्वास्थ्यं आरोग्यञ्चारुरूपताम्।
आप्नोति कलसैर्भानोर्गङ्गातोयाभिषेकतः॥
पितृनुद्दिश्य तान् देवान् स्नापयेद्गाङ्गवारिणा।
तृप्ताः स्युस्तस्य पितरो नरकस्थाश्च तत्क्षणात्॥
तत्तल्लोकान् प्रयान्त्येवं मोदन्ते तेषु वै चिरम्॥

तान् सूर्य्यादीन्।

मृत्कुम्भात्ताम्रकुम्भैस्तु स्नानं दशगुणं स्मृतम्।
रौप्यैः शतगुणं पुण्यं हैमैः कोटिगुणं फलम्॥
एवमर्घ्येषु नैवेद्य-बलिपूजादिषु क्रमात्।
पात्रान्तरविशेषेण फलञ्चैवोत्तरोत्तरम्॥
विभवे सति यो मोहान्न कुर्य्याद्विधिविस्तरम्॥

---

(१) ख पुस्तके देवाश्च।

(२) [ ] चिह्नितपङ्क्तिरधिका।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नैतत्फलमवाप्नोति देवद्रोहः स उच्यते ॥
देवानां दर्शनं पुण्यं दर्शनात् स्पर्शनं वरम् ।
स्पर्शनादर्च्चनं श्रेष्ठं घृतस्नानमतःपरम् ॥
अष्टकृत्वो मन्त्रजपैः [१]पुष्पैश्चैव सुगन्धिभिः ।
प्राहुर्गङ्गाजलैः स्नानं घृतस्नानसमं बुधाः ॥
अर्घ्यद्रव्यविशेषेण गङ्गातोयेन यः सकृत् ।
[२]मागधप्रस्थमात्रेण ताम्रपात्रस्थितेन च ॥
भानवेऽर्घ्यं प्रदद्यात्तु स्वकीयपितृभिः सह ।
पुत्र-पौत्रैश्च संयुक्तः स्वर्गलोके महीयते ॥
आपः क्षीरं कुशाग्राणि घृतं दधि तथा मधु ।
रक्तानि करवीराणि तथा रक्तञ्च चन्दनम् ।
अष्टाङ्ग एषः अर्घ्यो वै भानवे परिकीर्त्तितः ॥

तथा—

शिवस्य विष्णोः सूर्य्यस्य दुर्गाया ब्रह्मणस्तथा ।
गङ्गातीरे प्रतिष्ठान्तु यः करोति नरोत्तमः ॥

प्रतिष्ठा स्थापनम् ।

तथैवायतनान्येषां कारयन्त्यतिशक्तितः ।
अन्यतीर्थेषु करणात् कोटिकोटिगुणं [३]लभेत् ॥
गङ्गातीरसमुद्भूतमृदा लिङ्गानि शक्तितः ।
सलक्षणानि कृत्वा तु प्रतिष्ठाप्य दिने दिने ॥

---

(१) ख ग-कुसुमप्रभूतैः । (२) ग गोदुग्ध- ।
(३) क ख पुस्तकद्वये भवेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मन्त्रैश्च पुष्पपत्राद्यैः पूजयित्वा स्वशक्तितः ।
गङ्गायां निक्षिपेन्नित्यं तस्य पुण्यं ततोऽधिकम् ॥

अथ प्रयोगः—

ॐ अद्याग्निहोत्र-बहुवेद-बहुदक्षिण-बहुयज्ञजन्यफलाधिक-फलप्राप्तिकामो गङ्गायां शिवलिङ्गपूजनमहं करिष्ये ॥

ॐ अद्य प्रह्लाद-निर्वृति-स्वास्थ्यारोग्य-चारुरूपताकामः कलसैर्गङ्गातोयेन भानोरभिषेकमहं करिष्ये ॥

ॐ अद्यान्यतीर्थाधिकरणकशिवप्रतिष्ठाजन्यफल-कोटिगुणफल-प्राप्तिकामो गङ्गायां शिवप्रतिष्ठामहं करिष्ये। एवं विष्णोः सूर्य्यस्य दुर्गाया ब्रह्मणश्च प्रतिष्ठावाक्यम्। एषामायतनकरणेऽप्येवम् ॥

ॐ अद्य पितृतात्कालिकतृप्ति-शिवलोकगमन-तल्लोकाधि-करणककामचारमोदनकामः पितरमुद्दिश्य कलसेन गङ्गाजलेन शिव[1]स्नपनमहं करिष्ये। पितरमुद्दिश्य सूर्य्यादिस्नपनेऽप्येवम्। पितामहादिकमुद्दिश्य शिवादिस्नपनेऽ[2]प्येवम्।

अथ जपः ।

तत्र भविष्ये—

सर्व्वानन्दप्रदायिन्यां गङ्गायां यो नरोत्तमः ।
अष्टाक्षरं जपेद्भक्त्या मुक्तिस्तस्य करे स्थिता ॥

---

(१) ख पुस्तके सङ्कल्पवाक्ये स्नपनपदस्थाने स्थापनपदं लिखितम् ।

(२) क पुस्तके—स्नाने ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गङ्गायां विधिना स्नात्वा जपेदष्टाक्षरं यदि।
सर्व्वयज्ञफलं तस्य सर्व्वदानफलं तथा॥
सर्व्वव्रतफलं तस्य भवेत् सर्व्वतपःफलम्॥
षण्मासादणिमाद्यास्तु सिद्धयोऽत्र भवन्ति वै।
नमो नारायणायेति प्रणवाद्योऽष्टवर्णकः॥

तथा—

नमः शिवायेति मन्त्र आदौ प्रणवसंयुतः।
सर्व्वधर्म्मप्रदः सद्यो विधिना शिवभक्ति(दः)तः॥

तथा—

चतुर्व्विंशतिभिर्लक्षैर्जप्तैः सिद्धो भवेद्ध्रुवम्।
सम्यक्सिद्धैकमन्त्रस्तु शिवतुल्यो भवेत् सुखी॥
[1]पञ्चाक्षरी सिद्धमन्त्रः शिव एव न संशयः।
अपवित्रः पवित्रो वा सर्व्वावस्थाङ्गतोऽपि वा।
महापातकयुक्तोऽपि मन्त्रस्यास्य जपे यथा।
अधिकारी भवेत् सर्व्व इति देवोऽब्रवीच्छिवः॥

अष्टाक्षरजपे मुक्तिः। सर्व्वयज्ञ-सर्व्वदान-सर्व्वव्रत-सर्व्वतपः-फलं वा। षण्मासमितज्जपेऽणिमादिसिद्धिप्राप्तिः फलम्। पञ्चाक्षर-जपे सर्व्वधर्म्मशिवभक्तिप्राप्तिः फलम्। चतुर्व्विंशतिलक्षमितपञ्चा-क्षरजपे शिवतुल्यत्वं फलम्। अत्र च काम्यजपे यावकादिक-माहारो वक्तव्यः।

---

(१) क पुस्तके—पञ्चाक्षरः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ गङ्गापूजा।

तत्र स्मृतिः—

पूजितायान्तु गङ्गायां पूजिताः सर्व्वदेवताः।
तस्मात् सर्व्वप्रयत्नेन पूजयेदमरापगाम् ॥

भविष्ये—

चतुर्भुजां सुनेत्राञ्च सर्व्वावयवशोभिताम्।
रत्नकुम्भ-सिताम्भोज-वरदानाभयङ्कराम् ॥
श्वेतवस्त्रपरीधानां मुक्ता-मणिविभूषिताम्।
ततो ध्यायेत् सुरूपाञ्च चन्द्रायुतसमप्रभाम् ॥
चामरैर्वीज्यमानाञ्च श्वेतवस्त्रो(१)पशोभिताम्।
सुप्रसन्नां सुवदनां करुणार्द्रनिजान्तराम् ॥
सुधाप्लावितभूपृष्ठामार्द्रगन्धानुलेपनाम्।
त्रैलोक्यनमितां गङ्गां देवादिभिरभिष्टुताम् ॥
दिव्यरूपविभूषाञ्च दिव्यमाल्यानुलेपनाम्।
ध्यात्वा जले यथा प्रोक्तां तथाऽर्च्चायान्तु पूजयेत् ॥
तथा काम्यानवाप्नोति काम्याराधनतोऽपि च।
मासार्द्धमपि यस्त्वेवं नैरन्तर्य्येण पूजयेत् ॥
स एव पुरुषश्रेष्ठो नैरन्तर्य्यं हि दुष्करम्।
एवञ्च बहुकालं यो नैरन्तर्य्येण पूजयेत् ॥

---

(१) क पुस्तके—च्छत्रोपशोभिताम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्य पुण्यफलं वक्तुं वागीशोऽपि न हि क्षमः।
महामखैर्महादानैस्तपोभिर्विधिवत् कृतैः॥
अनेकशतसाहस्रैर्न तत् फलमवाप्यते[1]।

बहुत्वञ्चाव्यवहितपक्षापेक्षं तेन त्रिपक्षादिकं लभ्यते।

ब्रह्मपुराणे--

[2][वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा।
क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात्॥]
तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलाम्॥

वैशाखशुक्लतृतीयामधिकृत्य भविष्ये—

रात्रौ जागरणं कृत्वा यवैर्बिल्वैस्तिलैस्तथा।
विष्णुं गङ्गाञ्च शम्भुञ्च पूजयेद् भक्तिभावतः॥
तथा सुगन्धिकुसुमैः कुङ्कुमागुरुचन्दनैः।
तुलसीबिल्वपत्राद्यैर्मातुलुङ्गफलादिभिः॥
धूपैर्दीपैश्च नैवेद्यैर्यथाविभवविस्तरैः।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च॥
दिव्यं विमानमास्थाय विष्णुलोके महीयते।
ततो महीतलं प्राप्य खाण्डवे जायते प्रभुः॥
राजा भूत्वा तु धर्म्मात्मा सुखानि विविधानि च।
भुञ्जीत द्विजसौभाग्यसंयुक्तो रूपशीलवान्॥
देहान्ते ज्ञानवान् भूत्वा शिवसायुज्यमाप्नुयात्॥

---

(१) ख पुस्तके—अवाप्यते।

(२) ख पुस्तके—[ ] चिह्नितश्लोकः पतितः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ प्रयोगः—

ॐ अद्य सर्व्वदेवतापूजनजन्यफलसमफलप्राप्तिकामोऽमुकस्ववाञ्छितफलप्राप्तिकामो वा गङ्गापूजनमहं करिष्ये ।

इति सङ्कल्प्य यथोक्तध्यानं कृत्वा चतुर्थ्यन्तनमोऽन्तनाम्ना पञ्चोपचारैस्तां पूजयेत् ।

ॐ पुरुषश्रेष्ठत्वकामो ऽद्यादि मासार्द्धं गङ्गापूजनमहं करिष्ये ।

ॐविधिवत्-कृतानेकशतसाहस्रमहामख-महादान-तपो-जन्य-फलसमफलप्राप्तिकामो अद्यादि बहुकालं गङ्गापूजनमहं करिष्ये ।

एवं सङ्कल्प्य यथोक्तं ध्यात्वा पञ्चोपचारैश्चतुर्थ्यन्तनमोऽन्तनाम्ना सम्पूज्य दशहराव्रतोक्तस्तवेन [१]स्तुत्वा प्रणिपत्य विसर्ज्जयेदिति ।

अथ दानम् ।

तत्र ब्रह्माण्डे—

यज्ञो दानं तपो जप्यं श्राद्धञ्च सुरपूजनम् ।
गङ्गायान्तु कृतं सर्व्वं कोटि-कोटिगुणं भवेत् ॥

भविष्ये--

यस्त्वक्षयतृतीयायां गङ्गातीरे ददाति वै ।
घृतधेनुं विधानेन तस्य पुण्यफलं शृणु ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
सहस्रादित्यसङ्काशः सर्व्वकामसमन्वितः ।
हेमरत्नमये चित्रे विमाने हंसभूषिते ॥

---

[१] ग पुस्तके—व्रतोक्तं ध्यात्वा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वकीयपितृभिः सार्द्धं रुद्रलोके महीयते ।
ततस्तु जायते विप्रो गङ्गातीरे धनान्वितः ॥
अन्ते तु ब्रह्मविद्भूत्वा मोक्षमाप्नोत्यसंशयम् ।
तथैव गोप्रदानञ्च विधिना कुरुते तु यः ॥
गोलोमसंख्यया तावत्कल्पान्यर्व्वुदसंख्यया ।
गोलोके शिवलोके वा कामधेनुप्रजान्वितः ॥
भुञ्जानः सर्व्वकामांस्तु दिव्यान् नानाविधान् बहून् ।
देवानामप्यलभ्यांश्च स्थित्वा तु सह बान्धवैः ॥
पितृभिश्च सुहृद्भिश्च सर्व्वरत्नविभूषितः ।
जायते सत्कुले पश्चात् धनधान्यसमाकुले ॥
रत्नकाञ्चनसम्पूर्णे शीलविद्यायशोऽन्विते ।
स भुक्त्वा विपुलान् भोगान् पुत्रपौत्रसमन्वितः ॥
सर्व्वदुःखविनिर्म्मुक्तः सर्व्वकामसमन्वितः ।
सर्व्वप्राणिप्रियो भूत्वा ततो मोक्षमवाप्नुयात् ॥
कपिला यदि दत्ता स्याद् विधिना वेदपारगे ।
नरकस्थान् पितॄन् सर्व्वान् स्वर्गं नयति वै तदा ॥
निवर्त्तनद्वयं भूमेर्गङ्गातीरे विशेषतः ॥
विप्राय वेदविदुषे तिथौ तस्यां विशेषतः ।
नरो ददाति भक्त्या वै तस्य पुण्यफलं त्विदम् ॥
तद्भूमिपरमाणूनां संख्ययाऽयुतसंख्यया ।
सोमेन्द्रविष्णुलोकेषु ब्रह्मलोके तथैव च ॥
शिवलोके तथा श्रीमान् भोगान् भुङ्क्ते यथाविधि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जायते रूपसम्पन्नः सर्व्वशोकविवर्ज्जितः ।
सर्व्वसम्पत्समृद्धस्तु सप्तद्वीपपतिर्भवेत् ॥
भेरीशङ्खादिनिर्घोषैर्गीतवादित्रनिस्वनैः ।
स्तुतिभिर्मागधानाञ्च सुप्तोऽसौ प्रतिबुध्यते ॥
सर्व्वसौख्यानवाप्येह सर्व्वधर्म्मपरायणः ।
नरकस्थान् पितॄन् सर्व्वान् प्रापयित्वा दिवन्तथा ।
स्वर्गस्थितान् पितॄन् सर्व्वान् मोचयित्वा महाद्युतिः ॥
अन्ते ज्ञानासिना छित्वा अविद्यां पञ्चपूर्व्विकाम्[1] ।
परं वैराग्यमापन्नः परं ब्रह्माधिगच्छति ॥

अयुतसंख्यया इत्यत्र तावत्कल्पानीति पूर्व्वोक्तमनुषज्यते ॥

निवर्त्तनलक्षणं मत्स्यपुराणे उक्तम्—

सप्तहस्तेन [2]दण्डः स्यात्त्रिंशद्दण्डा निवर्त्तनम्[3] ।
त्रिभागहीनं गोचर्म्ममानमाह प्रजापतिः[4] ॥

तथाच भविष्ये—

ग्रामं गङ्गातटे योऽसौ विप्रेभ्यः सम्प्रयच्छति ।
ब्रह्म-विष्णु-शिवेभ्यश्च दुर्गायै भास्कराय च ॥
सर्व्वदानेषु यत् पुण्यं सर्व्वयज्ञेषु यत्फलम् ।
सर्व्वतीर्थेषु यत्पुण्यं सर्व्वव्रत-तपःसु च ॥

---

(१) ग पुस्तके—पञ्चपर्व्विकाम् ।
(२) मूल पुस्तके—दण्डेन ।
(३) क ख पुस्तकद्वये—दण्डाच्चिवर्त्तनम् ।
(४) ग पुस्तके—मानमाहुर्मनीषिणः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सहस्रगुणितं तत्र फलं स्याद्भूमिदानतः ।
सूर्य्यकोटिप्रतीकाशैर्दिव्यस्त्रीकोटिसंयुतैः ॥
दिव्यरत्नमयैश्चित्रैर्विमानैर्वैष्णवे पुरे ।
क्रीड़ते सर्व्वसम्पन्नः [1]शाङ्करे च पुरे तथा ॥
स्वकीयपितृभिः सार्द्धं क्रीड़ते कालमक्षयम् ॥
यावत्तु ग्रामभूमेर्वै परमाणुषु संख्यया ।
भोगान् भुक्त्वा तथा लोके जायते योगिनां कुले ॥
अणिमादिगुणैर्युक्तः स्वयं भोगी भवत्यपि ।
देहान्ते निर्म्मले नित्ये परे ब्रह्मणि लीयते ॥
तथा तस्यां तृतीयायां वेदविद्ब्राह्मणाय वै ।
माषषोड़शमात्रं वा सुवर्णं यः प्रयच्छति ॥
स हेमरत्नखचिते विमाने सर्व्वगे शुभे ।
सर्व्वपापविनिर्म्मुक्तः सर्व्वभूषणभूषितः ॥
सर्व्वैश्वर्य्यसमृद्धश्च सर्व्वलोकेषु सर्व्वदा ।
ब्रह्माण्डान्तरसंस्थे तु रत्नभोगान् पृथग्विधान् ॥
अनुभूय स्वपितृभिर्यावदाहूतसंप्लवम् ।
ततो रुद्रस्य सायुज्यं प्राप्नोति च न संशयः ॥

तथा—

गङ्गायां कुशदानेन ब्रह्मलोकं समाप्नुयात् ।
विष्णोश्च[2] यवदानेन रुद्रलोकं तथैव च ॥
प्राप्नोति तिलदानेन होमेनैश्वर्य्यमाप्नुयात् ।

---

(१) ग पुस्तके—शशाङ्के ।   (२) मूले—विष्णौ च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सदाशिवपदं साचाद्रत्नदानेन चाप्नुयात्।
गो-भू-हिरण्यदानेन भक्त्या गङ्गातटे सकृत्॥
नरो न जायते भूयः संसारे दुःखसङ्कटे।
दीर्घायुष्ट्वन्तु वासोभिरन्नदानेन सम्पदः॥
विद्यादानेन वै ज्ञानं कीर्त्तिः कन्याप्रदानतः।
सर्व्वदानानि नियमा यमाश्चैव तपांसि च।
यज्ञो दानं तथा जप्यं श्राद्धञ्चेश्वरपूजनम्॥
गङ्गायान्तु कृतं सर्व्वं कोटि-कोटिगुणं भवेत्॥

तथा--

वासो हिरण्यरत्नानि पत्र-पुष्प-फलानि च।
अन्नदानादिकञ्चापि स्वस्य यद्यदतिप्रियम्॥
तत्तद्भक्त्येह गङ्गायै यः प्रयच्छति मानवः।
तत्तत् स्वर्गस्य चान्ते हि सम्प्राप्यैवेह जन्मनि॥
प्रेत्य चाप्नोति नियतं निर्व्वाणं वा निरञ्जनम्।
गङ्गातीरे नरो यस्तु जम्ब्वाम्रवकुलावृतम्॥
कदली-नारिकेलैश्च कपित्थाशोकचम्पकैः।
पनसैर्बिल्ववृक्षैश्च कदम्बाश्वत्थपाटलैः॥
नारङ्गैर्मातुलुङ्गैश्च वृक्षैरन्यैश्च संयुतम्।
जाती(ति)विजय-पुन्नाग-करवीरयुतं तथा।
निचितं कारयित्वैवमारामं पुष्पशोभितम्॥
शिवाय विष्णवे वापि दुर्गायै भास्कराय वा।
प्रयच्छति तथा भक्त्या सर्व्वार्थं परिकल्प्य च॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्य पुण्यफलं वक्ष्ये संक्षेपान्न तु विस्तरात् ।
यावन्ति तेषां वृक्षाणां पुष्प-मूल-फलानि च ॥
बीजानि च विचित्राणि तेषां मूलानि वै तथा ।
तावत्कल्पसहस्राणि तेषां लोके महीयते ॥

अथ प्रयोगः ।

तत्रादौ धेनुविधानम् ।

तत्र मत्स्यपुराणे,—

गुड़धेनुविधानस्य यद्रूपमिह यत् फलम् ।
तदिदानीं प्रवक्ष्यामि सर्व्वपापप्रणाशनम् ॥
कृष्णाजिनं चतुर्हस्तं प्रागग्रीवं विन्यसेद् भुवि ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य्य यत्नतः ॥
लघ्वेणकाजिनं तद्वत् वत्सस्य परिकल्पयेत् ।
प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् ॥
उत्तमा गुड़धेनुः स्यात् सदा भारचतुष्टयम् ।
वत्सं भारेण कुर्व्वीत भाराभ्यां मध्यमा स्मृता ॥
अर्द्धभारेण वत्सः स्यात् कनिष्ठा भारकेण तु ।
चतुर्थांशेन वत्सः स्यात् गृहवित्तानुसारतः ॥

तथाचायं शक्तिह्रासे द्रव्यह्रासस्तेन मुख्यकल्पशक्तेन न कल्पान्तरमाश्रयणीयम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्म्मतेर्विद्यते[1] फलम्॥
इति कात्यायनेन निषेधात्।

साम्परायिकं पारलौकिकम्। धेनुद्रव्यभिन्नमत्र वत्सद्रव्यं द्वयोः पृथक्द्रव्यकथनात्।

कामधेनुमहादाने तु नैवम्। तत्र वत्सद्रव्यस्य पृथगनभिधानात्।

धेनु-वत्सौ घृतास्यौ तौ सितसूक्ष्माम्बरावृतौ[2]।
शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ॥
सितसूत्रशिरानद्धौ सितकम्बलकम्बलौ।
ताम्रगड्डु(ण्ड)कपृष्ठौ तौ सितचामरलोमकौ॥
विद्रुमभ्रूयुगोपेतौ नवनीतस्तनान्वितौ।
क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ॥
सुवर्णशृङ्गाभरणौ राजतक्षुरसंयुतौ।
नानाफलसमायुक्तौ घ्राणगन्धकरण्डकौ॥

गन्धकरण्डकः सुरभिगन्धाढ्यद्रव्यं कर्पूरादि।

इत्येवं रचयित्वा तु धूपदीपैरथार्च्चयेत्।
या लक्ष्मीः सर्व्वभूतानां या च देवेष्ववस्थिता॥
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु।
देहस्था या च रुद्राणी शङ्करस्य सदा प्रिया॥

---

(१) क्वचित्—जायते।

(२) ग पुस्तके—सितसूक्ष्माम्बरावृतौ। ख पुस्तके—अम्बरावुभौ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धेनुरूपेण सा देवी मम पापं व्यपोहतु ।
विष्णोर्वक्षसि या लक्ष्मीः स्वाहा चैव विभावसोः ॥
चन्द्रार्कशक्रशक्तिर्या धेनुरूपा तु सा श्रिये ।
चतुर्मुखस्य या लक्ष्मीर्लक्ष्मीश्च धनदस्य हि ॥
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदाऽस्तु मे ।
स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजाञ्च या ॥
सर्व्वपापहरा धेनुस्तस्मा(१)च्छान्तिं प्रयच्छतु ।
एवमामन्त्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
विधानमेतद्धेनूनां सर्व्वासामिह पठ्यते ।
यास्तु पापविनाशिन्यः पठ्यन्ते दश धेनवः ॥
तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ।
प्रथमा गुड़धेनुः स्यात् घृतधेनुस्तथा परा ॥
तिलधेनुस्तृतीया तु चतुर्थी जलसंज्ञिका ।
क्षीरधेनुश्च विख्याता मधुधेनुस्तथा परा ॥
सप्तमी शर्कराधेनुर्दधिधेनुस्तथाऽष्टमी ।
रसधेनुश्च नवमी दशमी स्वस्वरूपतः ॥
कुम्भाः स्यु द्रवधेनूनामितरासान्तु राशयः ।
सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः ॥
नवनीतेन तैलेन तथान्येऽपि महर्षयः ।
एतदेव विधानं स्यात्तत्र वोपस्कराः स्मृताः ॥

---

(१) ख पुस्तके—धेनुर्मम।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मन्त्रावाहनसंयुक्ता सदा पर्व्वणि पर्व्वणि ।
यथाश्राद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदा ॥
अमेययज्ञफलदाः सर्व्वपापहराः शुभाः ।
अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः ॥
गुड़धेन्वादयो देया उपरागादिपर्व्वसु ।

अत्र घृतादिधेनुद्रव्यपरिमाणमपि गुड़धेनूक्तमेव ।

"विधानमेतद्धेनूनां सर्व्वासामपि पठ्यते ।"

इति सामान्येनातिदेशात् ।

कुम्भाः स्युर्द्रवधेनूनामितरासान्तु राशयः ।

इति भारचतुष्टयादिपरिमितद्रव्य-[1]व्यवस्थापनकथनम् ।

एवं घृतादिधेनुष्वपि कृष्णाजिनधारणं कुम्भकथनेनापि तद-बाधनात्, एतदेव विधानं स्यादिति वचनाच्च ।

केचित्तु—नात्राजिनमिच्छन्ति ।

भारस्तु पलसहस्रद्वयात्मकः ।

तदाहुः—तुला पलशतं ज्ञेयं भारः स्यात् विंशतिस्तुलाः ॥ इति

अयमत्र प्रयोगः ।

गोमयोपलिप्तायां भूमौ कुशानास्तीर्य्य तत्र प्राग्ग्रीवं चतुर्हस्तं कृष्णाजिनं धेन्वर्थं पातयित्वा तत्समीपे लघुकृष्णाजिनं प्राग्ग्रीवमेव वत्सार्थं धृत्वा तदुपरि शक्त्यनुसारेण भारचतुष्टयेन भारद्वयेन एकभारेण वा गव्यघृतेन घटेषु स्थापितेन धेनुं यथाक्रम-मेकभारेण अर्द्धभारेण भारचतुर्थांशेन वा गव्यघृतेनैव घटस्थेन वत्स-

(१) क पुस्तके प्रकार कथनम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुपकल्प्य उभावपि प्राङ्मुखावुदक्पादौ घृतास्यौ श्वेतश्लक्ष्णवस्त्र-वेष्टितौ शुक्तिमयकर्णाविक्षुमयपादचतुष्टयौ श्वेतमुक्तामयलोचनौ तदभ्यन्तरस्थेन्द्रनीलमयताराद्वयौ श्वेतसूत्रात्मकशिरानद्धौ श्वेत-कम्बलमयसास्नाकौ, ताम्रगड्डुकमयपृष्ठौ सितचामररोमाणौ प्रवालमयभ्रूयुगौ नवनीतस्तनौ क्षौमपुच्छौ कांस्यदोहौ सुवर्ण-शृङ्गौ राजतखुरौ नानाफलममायुक्तौ अगुरुप्रभृतिसुरभिद्रव्य-निर्म्मितघ्राणावेवं धेनु वत्सौ निर्म्माय "ॐ सोपकरणसवत्सघृत-धेनवे नमः" ।

एवं धूपं दीपं नैवेद्यं दत्त्वा ॐ ब्राह्मणाय नमः इति त्रिः सम्पूज्य "ॐ इमां सोपकरणां सवत्सां घृतधेनुं ददानि" इति द्विजकरे जलं दत्त्वा धेनुं प्रोक्ष्य ॐ या लक्ष्मीरित्यादिश्लोकपञ्चकं पठित्वा कुशतिलजलान्यादाय—

ॐ अद्याक्षयतृतीयायां गङ्गातीरे बहुकल्पकोटिशतावच्छिन्नहेम-रत्नमयचित्रहंसभूषित-विमानाधिकरणक-स्वकीयपितृगणसहित--सहस्रादित्यसङ्काश-सर्व्वकामसमन्वितस्वीयरुद्रलोकमहितत्व—तदु-त्तरगङ्गातीराधिकरणक-धनान्वितविप्रत्वभवनान्तकालिक-ब्रह्म--विज्ञवनानन्तरमोक्षावाप्तिकामः—

इमां गोमयोपलिप्तास्तीर्णकुशभूम्युपरिस्थ-लघुप्राग्ग्रीवैणकाजि-नस्थ-घृतास्यसितसूक्ष्माम्बरावृत-शुक्तिकर्णेक्षुमयचतुष्पाद-शुचिमुक्ता-फलेक्षण-सितसूत्रशिरानद्ध-सितकम्बलकम्बल-ताम्रगड्डुकपृष्ठ-सित-चामररोमक—विद्रुमभ्रूयुगोपेत—नवनीतस्तनान्वित--क्षौमपुच्छ--कांस्यदोहेन्द्रनीलतारक-सुवर्णशृङ्गाभरण-राजतखुर-नानाफलसमा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युक्त गन्धमयनासिक--स्व चतुर्थभाग परिमित घृतमय वत्ससहितां गोमयोपलिप्तास्तीर्णकुशभूम्युपरिस्थितचतुर्हस्तप्राग्ग्रीवकृष्णाजिन-स्थितां प्राङ्मुखीमुदक्पादां घृतास्यां सितसूक्ष्माम्बरावृतां शुक्ति-कर्णामिक्षुमयचतुष्पादां शुचिमुक्ताफलेक्षणां सितसूत्रशिरानद्धां सितकम्बलकम्बलां ताम्रगण्डूकमयपृष्ठां सितचामररोमकां विद्रुमभ्रूयुगोपेतां नवनीतस्तनान्वितां क्षौमपुच्छां कांस्यदोहा-मिन्द्रनीलतारकां सुवर्णशृङ्गाभरणां राजतखुरां नानाफलसमायुक्तां विशिष्टगन्धमयनासां घृतमयीं धेनुं विष्णुदैवताममुकगोत्रायामुक-शर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ॐ स्वस्ति ॥

ॐ अद्य कृतैतत्-सोपकरणवत्ससहितघृतधेनुदानप्रतिष्ठार्थम् इदं सुवर्णमग्निदैवतमित्यादि ॥ ततः पुच्छे धेनुं स्पृष्ट्वा द्विजः कामस्तुतिं पठेत् ॥

अथाक्षयतृतीयायां गोदानम् ।

तत्र प्रयोगः—

गो-ब्राह्मणौ सम्पूज्य द्विजकरे जलं दत्वा 'गामालभ्य— ॐ अद्याक्षयतृतीयायां गङ्गातीरे गोलोमसमसंख्यककल्पार्व्वुदाव-च्छिन्न-गोलोक शिवलोकान्यतराधिकरणक-बान्धवपितृमातृसुहृद्-सहित-कामधेनुप्रजान्वित स्त्रीयदिव्यनानाविधदेवालभ्य सर्व्वका-मोपभोगवत्स्थिति--तदनन्तरधनधान्यसमाकुल—रत्नकाञ्चनभूपूर्ण-

(१) ग पुस्तके—गामभिषिच्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शीलविद्यायशोऽन्वित सत्कुलाधिकरणकजन्म-यशः पुत्रपौत्रसमन्वित सर्व्वदुःखविनिर्मुक्त-सर्व्वकामसमन्वित-सर्व्वप्राणिप्रिय-स्वकर्त्तृक-विपुलबहुभोगोपभोग-तदुत्तरमोक्षावाप्तिकाम इमां गां रुद्रदैवता-मित्यादि ।

कपिलादाने,—

ॐ कपिलगव्यै नमः, ॐ ब्राह्मणाय नमः, इति कपिलामभि-षिच्य, अद्याक्षयतृतीयायां गङ्गातीरे नरकस्थसर्व्वपितृ-स्वर्गनयन-काम—ॐ इमां कपिलां गां रुद्रदैवताममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय वेदपारगाय तुभ्यमहं सम्प्रददे । ॐ स्वस्तीत्यादि । दक्षिणां पूर्व्ववद्दद्यात् ।

अथ भूमिदानम् ।

ॐ अद्याक्षयतृतीयायां गङ्गातीरे दातव्यभूमिपरमाणुसमसंख्यक-कल्पायुतावच्छिन्न सोमेन्द्रब्रह्मविष्णुशिवलोकाधिकरणक श्रीमत्-स्वकर्त्तृक-बहुभोगोपभोग-तदुत्तररूपसम्पन्न--सर्व्वरोगविवर्ज्जित-सर्व्वसम्पत्समृद्ध--भेरीशङ्खादिनिर्घोष--गीतवादित्रनिःस्वन--मागध-स्तुतिकरणकसुप्तिप्रतिबोधवत्सप्तद्वीपपतित्वभवन---सर्व्वधर्म्मपरा---यणस्वकर्त्तृकसर्व्वसौख्यावाप्ति- नरकस्थसर्व्वपितृ-स्वर्गनयन-स्वर्गस्थ-सर्व्वपितृ-मोक्षप्रापणानन्तर-महाद्युति-स्वकर्त्तृकाविद्याच्छेदपर-वैराग्योत्पत्तिपरब्रह्माधिगमनकाम इमां भूमिं निवर्त्तनद्वयमितां प्रियदत्तां विष्णुदैवतामित्यादि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ ग्रामदानम् ।

ग्राम-ब्राह्मणौ सम्पूज्य—ॐ अद्याक्षयतृतीयायां गङ्गातीरे सर्व्वदान सर्व्वयज्ञ सर्व्वतीर्थ सर्व्वतपोजन्यफलसहस्रगुणफलप्राप्ति-सूर्य्यकोटिप्रतीकाशदिव्यस्त्रीकोटिसंयुक्त-दिव्यरत्नमय--विचित्र-बहु-विमानकरणकाक्षयकालव्यापि स्वपितृसहितसुक्रीड़न--दातव्य-ग्रामभू—परमाणु-समसंख्य तल्लोकाधिकरणक बहुभोगोपभोग-पूर्व्वकयोगिकुलजन्माणिमादिगुणयुक्तभोगिस्वभवन देहान्तकालिक-निर्म्मलनित्यपरब्रह्मलयकाम इमं ग्रामं विष्णुदेवतमित्यादि ।

अथ सुवर्णदानम् ।

ॐ अद्याक्षयतृतीयायां—गङ्गातीरे सर्व्वलोकाधिकरणक हेमरत्नखचितसर्व्वगशुभविमानाधिकरणक सर्व्वपापविनिर्मुक्त-सर्व्वैश्वर्य्यसमृद्ध स्वपितृसहित स्वकीययावदाहूतसंप्लवपृथग्विध-बहुभोगोपभोग-तदुत्तररुद्रसायुज्यप्राप्तिकाम इदं षोड़शमाषमितं सुवर्णमग्निदैवतमित्यादि ।

अथ यदा कदाचित् कुशदाने ब्रह्मलोकावाप्तिः । यवदाने विष्णुलोकावाप्तिः । तिलदाने रुद्रलोकावाप्तिः । तिलहोमे ऐश्वर्य्यम् । रत्नदाने शिवपदप्राप्तिः । गो-भू-हिरण्यान्यतमदाने पुनर्जन्माभावः । वस्त्रदाने दीर्घायुष्ट्वम् । अन्नदाने सम्पदः । विद्यादाने ज्ञानम् । कन्यादाने कीर्त्तिः ।

गङ्गायै वस्त्रहिरण्यरत्नपत्रपुष्पफल (१)स्वप्रियाणामन्यतमदाने स्वर्गानन्तर-तद्वस्तुप्राप्ति तदुत्तरनिर्वाणप्राप्तिः फलम् ।

---

(१) क पुस्तके—सुप्रेयानाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विहितं कर्म्म यद्गङ्गातीरे क्रियते तस्य कोटिगुणं फलम्। जम्ब्वाम्र-वकुल-कदली नारिकेल-कपित्थाशोक चम्पक-पनस विल्व-कदम्बाश्वत्थ---पाटलानागरङ्ग- मातुलुङ्गामलकी–तिन्तिड़ी–सह--कारादिसंयुक्तं जाति-विजय-पुन्नाग-करवीर-विचिकीलादिशोभित-मारामं गङ्गातीरे कारयित्वा शिवाय विष्णवे दुर्गायै भास्कराय-दत्वा तदारामस्थवृक्षीयपुष्पमूलफलबीजसमसंख्य कल्पसहस्रावच्छिन्न शिवादिलोकमहितत्वावाप्तिः फलम्।

तथात्र—गङ्गातीरे यथोक्तमारामं कारयित्वा चतुर्द्दश्यादौ शिवं सम्पूज्यारामञ्च प्रोच्य—

ॐ अद्यामुकमासीयामुकतिथौ एतदारामवृक्षीयपुष्प-मूल-फल-बीज-तन्मूलसमसंख्यककल्पसहस्रावच्छिन्न शिवलोकमहितत्वा-वाप्तिकामोऽमुमारामं गङ्गातीरे स्वकारितं वनस्पतिदैवतं भगवते शिवायाहं ददे। एवं विष्ण्वादिदानेऽपि वाक्यं शिवलोकस्थाने विष्णुलोके इति विशेषः।

अथ गङ्गायां व्रतफलम्।

तत्र भविष्ये,—

अष्टमूर्त्तिधरां गङ्गां दिव्यरूपां निरीक्षितुम्।
साक्षादेवाशु मर्त्यानां तमुपायं व्रतं वद॥
शालितण्डुलप्रस्थेन द्विप्रस्थपयसा तथा।
पायसं पाचयित्वा तु मधुखण्डं घृतन्तथा॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्येकं पलमात्रन्तु तत्र निक्षिप्य भक्तितः ।
तत्पायसमपूपांश्च मोदकान् मण्डलानि च ॥
तथा गुञ्जार्द्धमात्रञ्च सुवर्णं रूप्यमेव च ।
चन्दनागुरुकर्पूरकुङ्कुमानि च गुग्गुलुम् ॥
विल्वपत्राणि दूर्व्वाश्च रोचनां सितसर्षपम् ।
नीलोत्पलस्य पुष्पाणि पुष्पाभावे दलान्यपि ॥
यथाशक्त्या महाभक्त्या गङ्गायां यो विनिक्षिपेत् ।
पौर्णमास्यां मासि मासि दर्शे च प्रहरद्वये ॥
श्रद्धयाऽनेन मन्त्रेण यावत् संवत्सरन्तथा ।
ॐ गङ्गायै नारायण्यै शिवायै च नमो नमः ॥
इति मन्त्रेण सततं शतमष्टोत्तरं जपेत् ।
गङ्गाजलान्तःस्थित्वा च तन्मनास्त्यक्तसंशयः ॥
हविष्याशी मिताहारी यमी तेषु दिनेषु च ।
संवत्सरान्ते तस्यैषा गङ्गा दिव्यवपुर्धरा ॥
दिव्यमालाम्बरधरा दिव्यरत्नविभूषिता ।
प्रत्यक्षरूपा पुरतस्तिष्ठत्येव वरप्रदा ॥
एवं प्रत्यक्षतः साक्षात् गङ्गां दिव्यवपुर्धराम् ।
दृष्ट्वा स्वचक्षुषा मर्त्त्ये वरदानसमुद्यताम् ॥
यान् यान् कामयते मर्त्त्यस्तांस्तान् कामानवाप्नुयात् ।
निष्कामस्तु लभेन्मोक्षं स तेनैव च जन्मना ॥

मण्डलं मण्डलाकारशष्कुलीविशेषः पूरिकादिः । अत्र यावकानीति पाठान्तरम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शृणुध्वं भक्तितो यूयं वक्ष्यामि मुनिपुङ्गवाः ।
सर्व्वव्रतानां राजानं धर्म्मव्रतमनुत्तमम् ॥
वृषध्वजेन कथितं शिवेन दयया पुरा ।
प्रीत्या देव्या च पृष्टेन गङ्गातीरनिवासिना ॥
देवैस्तु भुक्तं पूर्व्वाह्णे मध्याह्ने ऋषिभिस्तथा ।
अपराह्णे च पितृभिः शर्व्वर्य्यां गुह्यकादिभिः ॥
सर्व्ववेलामतिक्रम्य नक्तंभोजनमुत्तमम् ॥
उपवासात् परं भैक्ष्यं भैक्ष्यात्परमयाचितम् ।
अयाचितात् परं नक्तं तथा नक्तेन वर्त्तयेत् ॥
हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्यां नक्तंभोजी षड़ाचरेत् ॥

लाघवमिति-आहारस्तावदर्द्धोदरपूरणः-अर्द्धमन्नेन पूरयेदित्यभिधानात् तस्याप्यर्द्धत्वं लाघवं "समं स्यादश्रुतत्वात्" इति न्यायात् । अग्निकार्य्यं होमः स च घृतेन महाव्याहृतिमन्त्रेण च प्रजापतिदेवताकः ।

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥

इति कात्यायनवचनात् ।

संख्या चाष्टोत्तरशतमष्टाविंशतिरष्टौ वा ।
होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥

इति देवीपुराणवचनात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा तत्रैव—

गङ्गातीरे माघमासे यः कुर्य्यान्नक्तभोजनम्।
शिवायतनपार्श्वे तु कृषरं घृतसंयुक्तम्॥
नैवेद्यञ्च निवेद्यैव कृषरान्नं शिवस्य तु।
[1]काष्ठमोलेन भुञ्जानो जिह्वालौल्यं विवर्ज्जयेत्॥
पलाशपत्रे भुञ्जानः शिवं स्मृत्वा जितेन्द्रियः।
धर्म्मराजस्य देव्याश्च पृथक् पिण्डं प्रकल्पयेत्॥
सोपवासश्चतुर्द्दश्यां भवेदुभयपक्षयोः।
पौर्णमास्यान्तु गन्धैश्च गङ्गायाः सलिलैस्तथा॥
शिवं संस्थाप्य पयसा मधुना च स्वशक्तितः।
तथैव [2]हेमपट्टञ्च लिङ्गमूर्द्ध्नि विनिःक्षिपेत्॥
ततो दद्यात् स्वशक्त्यैव शिवाय घृतकम्बलम्।
एकाढ़कं कृष्णतिलं शिवलिङ्गोपरि क्षिपेत्॥
नीलोत्पलैश्च सर्व्वेशं पूजयेत् पङ्कजैरपि।
अलाभे कारयेद्धेम्ना माषमात्रेण चोत्पलम्॥
पायसञ्चात्र मधुना घृतयुक्तञ्च गुग्गुलुम्।
घृतदीपं तथाचैव चन्दनाद्यैर्विलेपनम्॥
दद्यात् स्वशक्तितो भक्त्या तथा पत्रफलानि च।
कृष्णगोमिथुनञ्चैव स्वरूपञ्च निवेदयेत्॥
भोजयेत् ब्राह्मणानष्टौ मासान्ते तु सदक्षिणान्।
वर्ज्जयेन्मधुमांसञ्च तं मासं ब्रह्मचर्य्यवान्॥

---

(१) क ख पुस्तके-काष्ठमौनेन। (२) ग पुस्तके-होमपट्टञ्च।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं कृत्वा यथोद्दिष्टमेकवारमिदं व्रतम् ।
यमनियमसम्पन्नः श्रद्धाभक्तिपरायणः ॥
इह भोगानवाप्नोति प्रेत्य चानुत्तमाङ्गतिम् ।
इन्द्रनीलप्रतीकाशैर्विमानैः शिखिसंयुतैः ॥
दिव्यरत्नमयैश्चैव दिव्यभोगसमन्वितैः ।
गत्वा शिवपुरं रम्यं सर्व्वस्वकुलसंयुतः ॥
सुहृद्भिर्बहुभिश्चैव विविधानप्यभीप्सितान् ।
भुक्त्वा भोगानशेषांश्च यावदाहूतसंप्लवम् ॥
ततो भवति धर्म्मात्मा [1]सप्तद्वीपपतिस्तथा ॥
तत्र भुङ्क्ते समस्तांश्च भोगान् विगतकण्टकः ।
सुरूपः सुभगश्चैव नतिरस्कृतशासनः ॥
सर्व्वरोगविनिर्मुक्तः सोऽप्येतत्फलमाप्नुयात्[2] ।

तथा—

वैशाखे शुक्लपक्षे तु चतुर्द्दश्यां समाहितः ।
शाल्यन्नं क्षीरसंयुक्तं यः कुर्य्यान्नक्तभोजनम् ॥
शिवं सम्पूज्य पुष्पाद्यैर्भोज्यञ्च संनिवेद्य च ।
काष्ठमौलेन[3] भुञ्जानो वटकाष्ठेन वै ततः ॥
मौनेन प्रयतो भूत्वा कुर्य्याद्वै दन्तधावनम् ।
शिवलिङ्गसमीपे तु गङ्गातीरे निशि स्वपेत् ॥

---

(१) ख ग पुस्तकद्वये जम्बुद्वीपपतिः ।
(२) ख पुस्तके-फलभाग्भवेत् ।
(३) क ख पुस्तके-मौनेन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पौर्णमास्यां प्रभाते तु गङ्गायां विधिना तथा ।
स्नात्वोपवासं सङ्कल्प्य कुर्य्याज्जागरणं निशि ॥
लिङ्गं घृतेन संस्नाप्य पुष्पगन्धादिभिस्तथा ।
नैवेद्य-धूप दीपैश्च सम्पूज्य वृषभं शुभम् ॥
सुश्वेतवस्त्रपुष्पाद्यैर्हारिद्रै[1]श्चन्दनैस्तथा ॥

हारिद्रं सुवर्णम् ।

अलङ्कृत्य विधानेन शिवाय विनिवेदयेत् ।
ब्राह्मणांश्च यथाशक्ति पायसेन तु भोजयेत् ॥
एवं सकृच्च यो भक्त्या करोति श्रद्धयान्वितः ।
लभते [2]द्विपादानां (?) युगानां द्विसहस्रकम् ॥
तपः कृत्वा तु नियमात् यत् पुण्यं तदसंशयम् ।
हंसकुन्दप्रभायुक्तैर्विमानैश्चन्द्रसन्निभैः ॥
सुखेन वृषसंयुक्तैर्मुक्ताजालविभूषितैः ।
स्वकीयपितृभिः सार्द्धं प्रयातीश्वरमन्दिरम् ॥
नीलोत्पलसुगन्धाभिः [3]स्वरूपाभिः समन्ततः ।
कान्ताभिर्दिव्यरूपाभिर्भुञ्जन्[4] भोगानशेषतः ॥
अनन्तकालमैश्वर्य्ययुक्तो भूत्वा ततो भुवि ।
जायते स महीपालः कीर्त्ति-रूपसमन्वितः ॥

---

(१) क पुस्तके--घृताक्तैः ।
(२) ग पुस्तके—पादोनम् ।
(३) क पुस्तके—सुरूपाभिः ।
(४) ख ग पुस्तके—भुक्त्वा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकच्छत्रेण स महीं पालयत्याज्ञया सह ।
अन्ते वैराग्यसम्पन्नः स गङ्गां [1]लभते पुनः ॥
स तया श्रद्धया युक्तो गङ्गाया मरणं लभेत् ।
तथा तत्र [2]स्मृतिं लब्ध्वा मोक्षमाप्नोति स ध्रुवम् ॥

अथ दशहराव्रतम् ।

भविष्ये—

ज्यैष्ठे मासि सिते पक्षे दशम्यां हस्तसंयुते ।
गङ्गातीरे तु पुरुषो नारी वा भक्तिभावतः ॥
निशायां जागरं कृत्वा गङ्गां दशविधैस्तथा ।
पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसंख्यया ॥
तथैव [3]दीपैस्ताम्बूलैः पूजयेत् श्रद्धयान्वितः ।
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥
दशप्रसृति कृष्णांश्च तिलान् सर्पिश्च वै जले ॥
शक्तुपिण्डान् गुड़पिण्डान् दद्याच्च दशसंख्यया ।
ततो गङ्गातटे रम्ये हेम्ना रौप्येण वा तथा ॥
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ।
पद्मस्वस्तिकचिह्नस्य संस्थितस्य तथोपरि ॥
वद्धस्रग्दामकण्ठस्य पूर्णकुम्भस्य चोपरि ।

---

(१) क पुस्तके—भजते ।   (२) ख पुस्तके स्थितिम् ।
(३) क पुस्तके वस्त्रैः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्थाप्य पूजयेद्देवीं तदभावे मृदापि वा ।
अथ [1]तत्राप्यशक्तश्चेत् लिखेत् पिष्टेन वै भुवि ॥
चतुर्भुजां सुनेत्राञ्च चन्द्रायुतसमप्रभाम् ।
रत्नकुम्भ-सिताम्भोज-वरदा-ऽभयसत्कराम्[2] ॥
श्वेतवस्त्रपरीधानां मुक्ताजालविभूषिताम् ।
स्मितवक्त्रां सुकेशाञ्च सर्व्वावयवशोभिताम् ॥
चामरैर्वीज्यमानाञ्च श्वेतच्छत्रोपशोभिताम् ।
सुप्रसन्नाञ्च वरदां करुणार्द्रनिजान्तराम् ॥
सुधाप्लावितभूपृष्ठामार्द्रगन्धानुलेपनाम् ।
त्रैलोक्यनमितां गङ्गां देवादिभिरभिष्टुताम् ॥
दिव्यरत्नपरीताञ्च दिव्यमाल्यानुलेपनाम् ।
ध्यात्वा जले यथाप्रोक्तां तथार्च्चायाञ्च पूजयेत् ॥
वच्यमाणेन मन्त्रेण कुर्य्यात् पूजामशेषतः ।
पञ्चामृतेन च स्नानमर्च्चायान्तु विशेषतः ॥
प्रतिमाग्रे स्थण्डिले तु गोमयेनोपलेपिते ।
नारायणं महेशञ्च ब्रह्माणं भास्करन्तथा ॥
भगीरथञ्च नृपतिं हिमवन्तं नगेश्वरम् ।
गन्धपुष्पादिभिश्चैव यथाशक्ति प्रपूजयेत् ॥
दशप्रस्थान् तिलान् दद्यात् [3]दशगोभ्यो गवां[4] हितान् ।
प्रस्थः षोड़शपलानीति कल्पतरुः ॥

---

(१) ग पुस्तके तत्र प्रयत्नश्चेत् ।
(२) ख पुस्तके वरदानाभयङ्कराम् ।
(३) क पुस्तके-गव्यै ।
(४) ख पुस्तके-दशविप्रेभ्य एव च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मत्स्य-कच्छप-मण्डूक-मकरादिजलेचरान्।
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा॥
तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः।
गङ्गायां प्रक्षिपेदाज्यं दीपांश्चैव प्रवाहके॥
रथयात्रां दिने तस्मिन् विभवे सति कारयेत्।
रथारूढ़प्रतिकृतेर्गङ्गायास्तूत्तरामुखम्।
भ्रमन्त्यादर्शनं[१] लोके दुर्लभं पापकर्म्मणाम्॥
[२]यथा दुर्गारथयात्रा तथैवात्रापि कारयेत्।
एवं कृत्वा विधानेन वित्तशाठ्यविवर्ज्जितः।
दशपापैर्वक्ष्यमाणैः सद्य एव विमुच्यते॥
अदत्तानामुपादानं हिंसा चैवाविधानतः।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः।
असम्बद्धप्रलापश्च वाचिकं स्याच्चतुर्व्विधम्॥
परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्।
वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम्।
एतैर्दशविधैः पापैर्जन्मकोटिसमुद्भवैः॥
मुच्यते नात्र सन्देहो ब्रह्मणो वचनं यथा।
दशत्रिंशच्छतान् पूर्व्वान् पितॄनेव तथा परान्॥
उद्धरत्येव संसारान्मन्त्रेणानेन पूजयेत्।
ॐ नमो नारायण्यै दशहरायै गङ्गायै नमोनमः॥

---

(१) ग पुस्तके-दर्शनम्। (२) ग पुस्तके-पङ्क्तिर्नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति मन्त्रञ्च यो मर्त्यो दिने तस्मिन् दिवानिशम् ।
जपेत् पञ्चसहस्राणि दशधर्म्मफलं लभेत् ॥
उद्धरेद्दशपूर्व्वन्तु कुलञ्चैव भवार्णवात् ।
वक्ष्यमाणमिदं स्तोत्रं विधिना प्रतिपूज्य च ॥
गङ्गाग्रे तद्दिने जप्यं [1]द्विस्तत्पूजां प्रवर्त्तयेत् ।
ॐ नमः शिवायै गङ्गायै शिवदायै नमोऽस्तु ते ॥
नमोऽस्तु विष्णुरूपिण्यै गङ्गायै ते नमोनमः ।
सर्व्वदेवस्वरूपिण्यै नमो भेषजमूर्त्तये ॥
सर्व्वस्य सर्व्वव्याधीनां भिषक्श्रेष्ठे नमोऽस्तु ते ।
स्थानुजङ्गमसम्भूतविषहन्त्रि नमोऽस्तु ते ॥
संसारविषनाशिन्यै जीवनायै नमोनमः ।
तापत्रितयहन्त्र्यै च प्राणेश्यै ते नमोनमः ॥
शान्तिसन्तानकारिण्यै नमस्ते शुद्धमूर्त्तये ।
सर्व्वसंशुद्धिकारिण्यै नमः पापारिमूर्त्तये ॥
भुक्ति-मुक्तिप्रदायिन्यै भद्रायै ते नमोनमः ।
भोगोपभोगदायिन्यै भोगवत्यै नमोनमः ॥
मन्दाकिन्यै नमस्तेऽस्तु स्वर्गदायै नमोनमः ।
नमस्त्रैलोक्यभूतायै त्रिदशायै नमोनमः ।
नमस्त्रिशुक्लसंस्थायै क्षेमवत्यै नमोनमः ॥
त्रिदशायनसंस्थायै तेजोवत्यै नमोनमः ।
मन्दायै लिङ्गधारिण्यै नारायण्यै नमोनमः ॥

---

(१) क ख पुस्तके क्रत्स्नं पूजाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नमस्ते विश्वमित्रायै रेवत्यै ते नमोनमः ।
बृहत्यै ते नमस्तेऽस्तु लोकधात्र्यै नमोनमः ॥
नमस्ते विश्वमुख्यायै नन्दिन्यै ते नमोनमः ।
पृथ्व्यै शिवामृतायै च विरजायै नमोनमः ॥
परापरगताढ्यायै तारायै ते नमोनमः ।
पापजालनिकृन्तन्यै अभिन्नायै नमोनमः ॥
शान्तायै ते प्रतिष्ठायै वरदायै नमोनमः ।
उग्रायै सुखजल्यायै सञ्जीवन्यै नमोनमः ॥
ब्रह्मगायै ब्रह्मदायै दुरितघ्न्यै नमोनमः ।
(१)सर्व्वापत्प्रतिपच्चायै मङ्गलायै नमोनमः ॥
प्रणतार्त्तिप्रभञ्जिन्यै जगन्मात्रे नमोनमः ।
निस्तुषायै दुर्गहन्त्र्यै दक्षायै ते नमोनमः ॥
परात्परपरे तुभ्यं नमस्ते मोक्षदे सदा ।
गङ्गा ममाग्रतो भूयाद्गङ्गा मे पार्श्वयोस्तथा ।
गङ्गा मे सर्व्वतो भूयात्त्वयि गङ्गेऽस्तु मे स्थितिः ॥
आदौ त्वमन्ते मध्ये च सर्व्वं त्वं गाङ्गते शिवे ।
त्वमेव मूलप्रकृतिस्त्वं हि नारायणः प्रभुः ।
गङ्गे त्वं परमात्मा च शिवस्तुभ्यं नमः शिवे ॥
इतीदं पठति स्तोत्रं नित्यं भक्तिपरो हि यः ।
शृणोति श्रद्धया यश्च कायवाक्चित्तसम्भवैः ॥

---

(१) खपुस्तके-परापत्- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दशधासंस्थितैर्दोषैः सर्व्वैरेव विमुच्यते।
रोगस्थो मुच्यते रोगादापद्भ्यश्च विमुच्यते॥
द्विषद्भ्यो बन्धनाच्चैव भयेभ्यश्च विमुच्यते।
सर्व्वान् कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते॥
इमं स्तवं गृहे यस्तु लिखित्वापि विनिक्षिपेत्।
नाग्निचौरभयं तस्य पापेभ्योऽपि भयं नहि॥
तस्यां दशम्यामेतत्तु स्तोत्रं गङ्गाजले स्थितः।
जपंश्च दशकृत्वश्च दरिद्रो वापि चाक्षमः॥
सोऽपि तत्फलमाप्नोति गङ्गां सम्पूज्य यत्नतः।
पूर्व्वोक्तेन विधानेन यत्फलं परिकीर्त्तितम्॥
यथा गौरी तथा गङ्गा तस्माद्गौर्य्याश्च पूजने।
विधिर्योऽभिमतः सम्यक् सोऽपि गङ्गाप्रपूजने॥
यथा शिवस्तथा विष्णुर्यथा विष्णुस्तथा ह्युमा।
उमा यथा तथा गङ्गा चातूरूप्यं न विद्यते॥
विष्णु-रुद्रान्तरं यच्च गङ्गा-गौर्य्यन्तरं यथा।
लक्ष्मीगौर्य्यन्तरं यच्च यो ब्रूते मूढ़धीस्तु सः॥

अथ व्रतप्रयोगः।

कस्यामपि पूर्णिमायां विध्यादिदोषरहितायां कृतनित्य-क्रियः—

ॐ भगवन् सूर्य्य भगवत्यो देवता अद्यादि वर्षं सर्व्वपञ्चदशी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रहरद्वयकालीनगङ्गाधिकरणकपायसादि-प्रक्षेपादि-व्रतमहमाचरिष्यामीति निवेद्य-कुशानादाय--ॐ गङ्गासाक्षात्कारकामोऽद्यादि-सर्व्वं प्रतिपौर्णमासं प्रतिदर्शं प्रहरद्वये गङ्गायां मधुखण्डघृतसहित-पायस बह्वपूप-मोदक-मण्डल-गुञ्जार्द्धमितसुवर्ण-रूप्य-चन्दनागुरु-कर्पूर--कुङ्कुमखण्ड--गुग्गुलु बहुनिम्बपत्र बहुदूर्व्वा--गोरोचना सितचन्दन-नीलोत्पल तत्पत्रान्यतमप्रक्षेपमहं करिष्ये। इति संकल्पयेत्।

ततः शालितण्डुलेन प्रस्थमितेन प्रस्थद्वयमितगव्यदुग्ध-साधितेन पायसे निष्पन्ने पलमितं मधु पलमितं खण्डम् पलमितं गव्यघृतञ्च प्रक्षिप्य तत्पायसमपूपत्रयं मोदकत्रयं मण्डलत्रयं वर्त्तिकार्द्धहिरण्यं वर्त्तिकार्द्धरजतं चन्दनमगुरु कर्पूरं कुङ्कुमं चन्दनं गुग्गुलुविल्वपत्राणि दूर्व्वाश्च गोरोचनां सितचन्दनं नीलोत्पलं तत्पत्रं वा सर्व्वमेकस्मिन् पात्रे निधाय तच्च दक्षिणहस्तेनादाय कृतनित्य-क्रियो दिवसमध्ये प्राङ्मुख उपविष्टः पवित्रोपग्रहपाणिराचान्त-स्तन्मनाः श्रद्धया भक्त्या च ॐ गङ्गायै नारायण्यै शिवायै नमो नम इति मन्त्रेणैकदैव गङ्गाप्रवाहे क्षिपेत्।

तत्र इममेव मन्त्रं—गङ्गाजलप्रविष्टो गङ्गां ध्यायन्नष्टोत्तर-शतं जपेत्।

ततस्तद्दिने संयतेन्द्रियो मितहविष्याशी च भवेदेवं प्रतिपञ्च-दशी वर्षपूर्त्तिपर्य्यन्तं भवेत्।

पूर्त्तिदिने चामावस्यात्मके ब्राह्मणत्रयं भोजयेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ माघप्रयोगः ।

प्रथमदिने प्रातः—ॐ भविष्यपुराणोक्तविधिना अद्यादि-माघं नक्तव्रतमहमाचरिष्यामीति[1] निवेद्य-कुशादिकमादाय—

ॐ ऐहिकबहुभोगोपभोगप्राप्त्यनन्तरानुत्तमगतिप्राप्तीन्द्रनील-प्रतीकाश-शिखिसंयुत-दिव्यरत्नमय-दिव्यभोगसमन्वित बहुविमान-करणकरम्यशिवपुरगमन—तदधिकरणक—सर्व्वस्वकुल—बहुसुहृत्स-हित-यावदाहूतसंप्लवविविधाभीप्सित--बहुभोगोपभोगकामोऽद्यादि-माघं भविष्यपुराणोक्तरीत्या गङ्गातीरे शिवायतनपार्श्वे नक्तव्रत-महमाचरिष्ये—

इति संकल्प्य प्रत्यहं पूर्व्वाह्णे शिवपूजां तिलमुद्गसहितैः श्वेतधान्यतण्डुलैः साधितकृशररूपनैवेद्यदानसहितां कुर्य्यात् यथोक्तहोमञ्च कुर्य्यात् ।

होमश्चायं शिवदेवताको व्रतपर्य्यालोचनेन शिवदेवताकत्वस्या-र्थतोऽतिदेशादिति केचित् ।

ततः सायं-सन्ध्योत्तरं कृशरान्नं केवलं पलाशपत्रे कृत्वा शिवं स्मृत्वा—ततश्च-धर्म्मराजाय नमः, दुर्गायै नमः, इति बलिद्वयं दत्वा हुँकारादि निवृत्या[2] भुञ्जीत ।

ततो रात्रौ भूमिस्थितायां शय्यायां शयीत । चतुर्द्दश्यामुपवास एव कर्त्तव्यः । पौर्णमास्यान्तु गन्धैर्गङ्गाजलेन दुग्धेन मधुना च अष्टोत्तरशतपलपरिमाणेन तन्न्यूनेनापि यथाशक्त्युपहृतेन शिवं

---

(१) ख पुस्तके—करिष्ये । (२) क पुस्तके—निवृत्त्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्नपयित्वा हेमपट्टं शिवमूर्द्ध्नि दत्त्वा घृतकमलं[1] शक्त्यनुसारेण दत्त्वा एकाढ़कमितान् कृष्णतिलान् शिवलिङ्गोपरि दत्त्वा ततो नीलोत्पलैस्तदभावे एकमाषमितहेमघटितोत्पलैः शिवं सम्पूज्य—ततः समधुपायसं नैवेद्यं तथा सघृतगुग्गुलुधूपं घृतदीपं तथा चन्दनादिविलेपनं तथा तत्र फलमूलादिकं तथा सुरूपं कृष्णगोमिथुनञ्च निवेद्य ततोऽष्टौ ब्राह्मणान् भोजयेत् किञ्चिद्दक्षिणां दद्यादिति।

इमञ्च मासं मधुमांसमैथुनवर्ज्जको यमनियमसम्पन्नः श्रद्धाभक्तिसमन्वितश्च भवेदिति।

अथ व्रतान्तरम्।

वैशाखशुक्लचतुर्द्दश्यां समाहितः पूर्व्वाह्णे शिवं पञ्चोपचारैः सम्पूज्य भोज्यञ्च शिवाय निवेद्य नक्तं शाल्योदनं गव्यदुग्धसहितं महामौनेन भुक्त्वा वटकाष्ठेन महामौनेन दन्तान् संशोध्य गङ्गातीरे शिवलिङ्गसमीपे निशि स्वपेत्।

ततः प्रभाते गङ्गायां सविधि स्नात्वा—

ॐ भगवन् सूर्य्य भगवन्तो देवता अद्य भविष्यपुराणोक्तविधिना उपवासरूपव्रतमहमाचरिष्यामीति निवेद्य—

कुशाद्यादाय ॐ अद्य पादोनयुगसहस्रद्वयपर्य्यन्ततपःकरणजन्यपुण्य-समपुण्यप्राप्ति-हंसकुन्दप्रभायुक्त-चन्द्रसन्निभ-वृषभसंयुक्त-मुक्ताजालविभूषित-बहुविमानकरणक-स्वपितृगणसहितेश्वरमन्दिर-

---

(१) क पुस्तके—कम्बलम्। (२) क पुस्तके—नीलोत्पलदलैः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गमन--नीलोत्पलसुगन्धि-सुरूप[1]--बहुकान्तासहितैश्वर्य्ययुक्तस्वकर्त्तृकानन्तकाल-बहुभोगोपभोग-तदुत्तरकीर्त्ति-रूप-समन्वितैकच्छत्राज्ञासहित--महीपालत्वभवनान्तकालिकवैराग्यसम्पन्न--स्वीयगङ्गा--लाभश्रद्धायुक्तगङ्गामरणप्राप्ति---जातिस्मरणपूर्व्वकमोक्षावाप्तिकामो भविष्यपुराणोक्तविधिनोपवासमहं करिष्ये ।

इति सङ्कल्प्य तद्दिने उपवासं रात्रौ जागरणञ्च कुर्य्यात् । ततः प्रभातेऽष्टोत्तरशतपलपरिमितगव्यघृतेन शिवलिङ्गं स्नपयित्वा पञ्चोपचारैः सम्पूज्य श्वेतवस्त्र-पुष्प-चन्दन-सुवर्णालङ्कृतं वृषं शिव-वृषौ च सम्पूज्य—

ॐ अद्य इमं वृषभं श्वेतवस्त्र-पुष्प-हारिद्र-चन्दनालङ्कृतं रुद्र-दैवतं शिवायाहं ददे इति दद्यात् ।

ततो यथाशक्ति ब्राह्मणान् पायसं भोजयेदिति ।

अथ दशहराप्रयोगः ।

नवमीरात्रौ जागरणं कृत्वा दशम्यां कृतस्नानादिः—

ॐ अद्य ज्यैष्ठशुक्लदशम्यां हस्तयुक्तायां कोटिजन्मार्ज्जितदश-विधपापनाशकामो भविष्यपुराणोक्तरीत्या [2]दशहरापूजामहं करिष्ये ।

इति सङ्कल्प्य गङ्गायां विधिवत्स्नात्वा कृतदेवार्चनादिर्गङ्गां दशविधैर्गन्धैः पुष्पैर्धूपैर्दीपैर्नैवेद्यकैः फलैस्ताम्बूलैश्चार्च्चयेदिति ।

---

(१) क पुस्तके—दिव्यरूप— । (२) क पुस्तके—दशहरागङ्गा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततो गङ्गायां दशधा सविधि स्नात्वा-ॐ गङ्गायै नम इति मन्त्रेण कृष्णतिलानां दशप्रसृतीस्तथा सर्पिषां दशप्रसृतीस्तथा दश शक्तुपिण्डान् तथा दश गुड़पिण्डांश्च गङ्गायां चिपेत् ।

ततो गङ्गातीरेऽष्टदलमालिख्य तत्र वस्त्रमाल्यवेष्टितग्रीवं जलपूर्णं कुम्भं कृत्वा तदुपरि शराविकादौ हैमीं राजतीं[2] वा गङ्गाप्रतिमां चतुर्भुजां रत्नकुम्भ-सिताम्भोज-वरदाभयकृत्करां सुनेत्रां सर्व्वावयवशोभितां श्वेतवस्त्रपरीधानां मुक्ताजालविभूषितां कृत्वा ततोऽतिसौम्याच्चन्द्रायुतसमप्रभां चामरैर्वीज्यमानां श्वेतच्छत्रोपशोभितां सुप्रसन्नां करुणार्द्रहृदयां सुधाप्लावितभूपृष्ठां देवादिभिः स्तुतां दिव्यरत्नपरीधानां दिव्यमाल्यानुलेपनां गङ्गां प्रवाहे प्रतिमायाञ्च ध्यात्वा—

प्रत्येकं द्वात्रिंशद्रक्तिकाधिकतोलकद्वयसहितैकविंशतिपलमितेन गव्येन दुग्धेन दध्ना घृतेन मधुना खण्डितेन च पञ्चामृतं कृत्वा तेन तत्प्रतिमां स्नपयित्वा—

ॐ नमो नारायण्यै दशहरायै गङ्गायै नमो नमः ।

इति पठित्वा इदं पाद्यमेषोऽर्घ्यं इदमाचमनीयं इदं स्नानीयमित्यादि प्रत्येकं दद्यात् ।

ततो गन्धं दत्वा उक्तमन्त्रेण त्रिः सम्पूज्य धूपादि दत्वा प्रतिमाग्रतः स्थण्डिले गोमयेनोपलिप्य नारायणं महेशं ब्रह्माणं भास्करं भगीरथं हिमवन्तञ्च पञ्चोपचारैः सम्पूज्य दशभ्यो विप्रेभ्यो दशतिलप्रस्थान् दद्यात् ।

---

(२) क पुस्तके—मार्त्तिकीम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा दशभ्यो गोभ्यो दशयवप्रस्थान् दत्वा मत्स्य-कच्छप-मण्डूक-मकर-शिशुमार-डुण्डुभ-भद्रक--जलौकः-शम्बूक-शङ्खान् दशजलचरान् राजतान् पैष्टकान् वा गन्धादिभिरभ्यर्च्य गङ्गायां चिपेत्।

ततो दश घृतदीपान् प्रवाहे दद्यात्।

सति विभवे गङ्गाप्रतिमां रथमारोप्य भ्रामयेत्।

ततोऽधिकफलाय—ॐ नारायण्यै दशहरायै गङ्गायै नमो नमः, इति मन्त्रं पञ्चसहस्रकृत्वो जपेत्।

अत्र [1]भवार्णवापादनपूर्व्वकदशकुलोद्धरणं फलम्।

अथ गङ्गायां श्राद्धफलम्।

तत्र भविष्यपुराणे—

गयाश्राद्धं कृतन्तेन उत्सृष्टस्तु वृषस्तथा।
येन तद्वीचिसंसिक्ते तीरे श्राद्धमकारि च॥
तस्यालं तीर्थगमनं शरीरपरिशोधनम्[2]।
येन गङ्गाजले स्नानं कृतं श्राद्धञ्च श्रद्धया॥

तथा—

पितृनुद्दिश्य यो भक्त्या पायसं मधुसंयुतम्।
गुड़सर्पिःसमायुक्तं गङ्गाम्भसि विनिचिपेत्॥
तृप्ता भवन्ति पितरस्तस्य वर्षशतत्रयम्।

---

(१) ग पुस्तके—दशधर्म्मफललाभ इति वाक्यमधिकम्।

(२) क पुस्तके—शोषणम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]गङ्गा-यमुनयोस्तीरे पयोष्णामरकण्टके।
नर्म्मदायां गयातीर्थे सर्व्वमानन्त्यमश्नुते॥
एषु तीर्थेषु यच्छ्राद्धं तत्कोटि-गुणमिष्यते।
गङ्गायां यत्कृतं तत्तु श्रद्धया चापवर्गदम्॥

ॐ अद्य गयाश्राद्ध-वृषोत्सर्गजन्यफल-समफलप्राप्तिकामो गङ्गावीचिसंसिक्ततीरे श्राद्धमहं करिष्ये।

ॐ अद्य तीर्थगमन-शरीरपरिशोधन[2]जन्यफलसमफलप्राप्ति-कामो गङ्गासमीपे श्राद्धमहं करिष्ये।

ॐ अद्यानन्तपितृतृप्तिकामो गङ्गातीरे श्राद्धमहं करिष्ये।

ॐ अद्य श्राद्धजन्यफलकोटिगुणफलप्राप्तिकामो गङ्गातीरे श्राद्धमहं करिष्ये।

ॐ अद्यापवर्गप्राप्तिकामः श्रद्धया श्राद्धमहं करिष्ये।

ॐ अद्य वर्षशतत्रयावच्छिन्न-पितृतृप्तिकाम इदं पायसं मधु-गुड़-सर्पिःसमायुक्तं गङ्गाम्भस्यहं प्रक्षेप्स्यामीति सङ्कल्प्य सव्येनैव प्राङ्मुख उपविष्टः प्रक्षिपेत्।

अथ गङ्गान्तर्जलमरणफलम्।

तत्र स्मृतिः—

शुक्लपक्षे दिवा भूमौ गङ्गायामुत्तरायणे।
धन्या देहं विमुञ्चन्ति हृदयस्थे जनार्द्दने॥

---

(१) क पुस्तके यमस्रोत— ख पुस्तके विष्णुरिति कृत्वा वचनं लिखितम्।

(२) ग पुस्तके—शोषण।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आग्नेयपुराणे—गङ्गां प्रति विष्णुवाक्यम्—

ये मुञ्चन्ति नराः प्राणांस्तिष्ठन्तः सन्निधौ तव ।
ते मे लोकं गमिष्यन्ति पूज्यमाना दिवौकसाम् ॥

तत्रैव—

अर्द्धोदके तु जाह्नव्या म्रियतेऽनशनेन यः ।
स याति न पुनर्जन्म ब्रह्मसायुज्यमेति च ॥

अर्द्धोदकं चरणान्नाभिपर्य्यन्तमुदकम् ।

ब्रह्माण्डपुराणे,—

या गतिर्योगयुक्तस्य सत्वस्थस्य मनीषिणः ।
सा गतिस्त्यजतः प्राणान् गङ्गायान्तु शरीरिणः ॥
[1]अनाशकं गृहीत्वा यो गङ्गातीरे मृतो नरः ।
सद्य एव परं मोक्षमाप्नोति पितृभिः सह ।
गङ्गायां मरणात् प्राणान् कः प्राज्ञस्त्यक्तुमर्हति ॥
गतानि बहुजन्मानि तत्र तत्र मृतानि च ।
महांश्चापि गतः कालो यत्र तत्रापि गच्छतः ॥
अत्र दूरे समीपे च सदृशं योजनद्वयम् ।
गङ्गायां मरणेनेह नात्र कार्य्या विचारणा ॥

ब्राह्मे—

अज्ञानतो ज्ञानतो वा कामतोऽकामतोऽपि वा ।
गङ्गायान्तु मृतो मर्त्त्यः स्वर्गं मोक्षञ्च बिन्दति ॥

---

(१) क ख पुस्तके अनशनम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भविष्ये—

प्राणेषूत्सृज्यमानेषु गङ्गां यः संस्मरेन्नरः ।
स्पृशेद्वा पापशीलोऽपि स याति परमां गतिम् ॥

भारते— गङ्गां गत्वा यैः शरीरं विसृष्टं
गता धीरास्ते विबुधैः समत्वम् ।

गङ्गासागरमुपक्रम्य—

अन्तरीक्षे क्षितौ तोये पापीयानपि यो मृतः ।
ब्रह्म-विष्णु-शिवैः पूज्यं पदमक्षयमश्नुते ॥

तथा—

उत्क्रामद्भिश्च यः प्राणैः प्रयतः शिष्टसम्मतः ।
चिन्तयेन्मनसा गङ्गां स गतिं परमां लभेत् ॥

ब्रह्माण्डे,—

यत्र तत्र मृतो वापि मरणे समुपस्थिते ।
भक्त्या गङ्गां स्मरन् याति नरः शिवपुरं मृतः ॥

अथ गङ्गायामस्थिस्थितिफलम् ।

तत्र विष्णुपुराणे,—

शम्भोर्जटाकलापात्तु विनिष्क्रान्तास्थिशर्कराः ।
प्लावयित्वा दिवं निन्ये यान् पापान् सगरात्मजान् ॥

कौर्म्मे—

यावन्त्यस्थीनि गङ्गायां तिष्ठन्ति पुरुषस्य वै ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गङ्गातोयेषु यस्यास्थि नीत्वा संक्षिप्यते नरैः ।
वर्षाणान्तु सहस्राणि तस्य स्वर्गे भवेत् स्थितिः ॥

ब्रह्माण्डपुराणे--

यस्मिन् काले नृणामस्थि गङ्गायां क्षिप्यते नरैः ।
तत्कालमादितः कृत्वा स्वर्गलोके भवेत् स्थितिः ॥

यमः—

गङ्गातोयेषु यस्यास्थि प्लवते शुभकर्म्मणः ।
न तस्य पुनरावृत्तिर्ब्रह्मलोकात् कथञ्चन ॥

गौड़ाः--

दशाहाभ्यन्तरे यस्य गङ्गातोयेऽस्थि मज्जति[१] ।
गङ्गायां मरणे यादृक् तादृक् फलमवाप्नुयात् ॥

अथास्थिप्रक्षेपप्रकारः ।

तत्र ब्रह्मपुराणे--

स्नात्वा ततः पञ्चगवेन सिक्त्वा
हिरण्य-मध्वाज्यतिलेन योज्यम्[२] ।
ततस्तु मृत्पिण्डपुटे निधाय
पश्यन् दिशं प्रेतगणोपगूढ़ाम् ।
नमोऽस्तु धर्म्माय वदन् प्रविश्य
जलं स मे प्रीत इति क्षिपेच्च ॥

---

(१) क ख पुस्तकद्वये अस्थिसंस्थितिः ।

(२) ख ग पुस्तकद्वये तिलैर्नियोज्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्नात्वा तथोत्तीर्य्य च भास्करञ्च
दृष्ट्वा प्रदद्यादथ दक्षिणान्तु ।
एवं कृते प्रेतपुरस्थितस्य
स्वर्गे गतिः स्यात्तु महेन्द्रतुल्या ॥

पञ्चगवं पञ्चगव्यम् ।

अथ तीरादिनिरूपणम् ।

तत्र ब्रह्मपुराणे--

प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ।
अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥
न तत्र प्रतिगृह्णीयात् प्राणैः कण्ठगतैरपि ।

दानधर्म्मे--

भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम् ।
तावद्गर्भं विजानीयात्तदूर्द्ध्वं तीरमुच्यते ॥

ब्रह्मपुराणे—

सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते ।

स्कन्दपुराणे—

तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते ।
अत्र दानं तपो होमो गङ्गायां नात्र संशयः ॥

उभयतटे प्रत्येकं क्रोशद्वयं क्षेत्रम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदुक्तं भविष्ये—

गङ्गासीमां न लङ्घन्ति सर्व्वपापान्यशेषतः।

दिशो दश पलायन्ते सिंहं दृष्ट्वा यथा मृगाः।

एकयोजनविस्ती(र्णा)र्णः क्षेत्रसीमा तटद्वयात्॥ इति

ब्रह्मपुराणे—

यत्र गङ्गा महाराज शम्भोस्तत्र तपोवनम्।

सिद्धिक्षेत्रन्तु तज्ज्ञेयं समन्तात्तु द्वियोजनम्॥

अत्र हस्तचतुष्टयाभ्यन्तरे प्रतिग्रहनिषेधः सर्व्वत्र। सार्द्ध-हस्तशताभ्यन्तरे तत्तीरे तन्निषेधो गण्डक्यादिप्रसिद्धनदीष्विति शिष्टाचारः।

क्षेत्रे प्रतिग्रहनिषेधस्तु गङ्गायामेव तत्रैव क्षेत्रकथनादिति व्यवस्था।

मत्स्यपुराणे—

तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च।

निमित्तेषु च सर्व्वेषु अप्रमत्तो भवेन्नरः॥

तीर्थे यः प्रतिगृह्णाति पुण्येष्वायतनेषु च।

निमित्तेषु च सर्व्वेषु क्षेत्रेषु च तथैव च॥

निष्फलं तस्य तत्तीर्थं यावत्तद्धनमश्नुते।

गङ्गायामन्यदपि तत्रैव—

तीरे प्रतिगृहीते तु विक्रीता जाह्नवी भवेत्।

गङ्गाविक्रयणाद्राजन् विष्णोर्विक्रयणं भवेत्।

जनार्द्दने तु विक्रीते विक्रीतं भुवनत्रयम्॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ तीरमृत्तिकाफलम्।

भारते—

गङ्गातीरसमुद्भूतां मृदं मूर्द्ध्ना[1] बिभर्त्ति यः।
बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम्॥

इति श्रीवाचस्पतिमिश्रविरचिते तीर्थचिन्तामणौ
तृतीयो गङ्गाप्रकाशः।

वायव्य-गारुत्मत-कल्पवृत्त्वान् दृष्ट्वा विचार्य्यापि च शास्त्रयुक्त्या।
तनोति नत्वाऽऽदिगदाधराय वाचस्पतिः श्रीपितृतीर्थसंज्ञाम्॥

अथ गयाविधिः।

तत्र कल्पतरौ मत्स्यपुराणे—

पितृतीर्थं गया नाम सर्व्वतीर्थवरं स्मृतम्।
यत्रास्ते देवदेवेशः स्वयमेव पितामहः॥
यत्रैषा पितृभिर्गाथा गीता भोगमभीप्सुभिः।
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥

गारुड़े ब्रह्मवाक्यम्—

सारात्सारतरं व्यास गयामाहात्म्यमुत्तमम्।
प्रवक्ष्यामि समासेन भुक्ति-मुक्तिफलप्रदम्॥
गयासुरोऽभवत्पूर्व्वं वीर्य्यवान् परमः स च।
तपोऽतप्यन्महाघोरं सर्व्वभूतोपतापनम्॥

---

(१) ख पुस्तके मूर्द्ध्नि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्तपस्तापिता देवा तद्बधार्थं हरिं गताः।
शरणं हरिरूचे तान् भवितव्यं शिवार्थिभिः[1]।
पातितेऽस्य मया देहे तथेत्यूचुः सुरा हरिम्॥
कदाचित् शिवपूजार्थं क्षीराब्धेः कमलानि च।
आनीय कीकटे देशे शयनञ्चाकरोद्वने॥
विष्णुमायाविमूढ़ोऽसौ गदया विष्णुना हतः।
अतो गदाधरो विष्णुर्गयायां मुक्तिदः स्थितः॥
तस्य देहे लिङ्गरूपी स्थितः शुद्धे[2] पितामहम्।
विष्णुराहाथ[3] मर्य्यादौ पुण्यक्षेत्रं भविष्यति॥
यज्ञं श्राद्धं पिण्डदानं स्नानादि कुरुते तु यः।
स स्वर्गं ब्रह्मलोकञ्च गच्छेन्न नरकं नरः॥
गयातीर्थं परं ज्ञात्वा यागञ्चक्रे[4] पितामहः॥
ब्राह्मणान् पूजयामास ऋत्विजः समुपागतान्।
नदीं रसवतीं सृष्ट्वा स्थितां व्याप्य दिशं तथा[5]॥
भक्ष्य भोज्यफलानाञ्च कामधेनुं तथाऽसृजत्।
पञ्चक्रोशं गयातीर्थं ब्राह्मणेभ्यो ददौ प्रभुः॥
धर्म्मयागे तु लोभाद्वै प्रतिगृह्य धनादिकम्।
स्थिता विप्रास्तदा शप्ता गयायां ब्रह्मणा ततः॥

---

(१) ग पुस्तके शिवात्मभिः।
(२) क पुस्तके शुद्धः।
(३) क ख पुस्तकद्वये आहेति।
(४) क ख पुस्तकद्वये यज्ञं कृत्वा।
(५) क ख पुस्तकद्वये ततः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मा भूत्त्रिपुरुषी विद्या मा भूत्त्रिपुरुषं धनम् ।
युष्माकं स्याद्वारिवहा नदी पाषाणपर्व्वतात् ॥
शप्तैस्तु प्रार्थितो ब्रह्माऽनुग्रहं कृतवान् प्रभुः ।
लोकाः पुण्या गयायां ये श्राद्धिनो ब्रह्मलोकगाः ।
युष्मान् ये पूजयिष्यन्ति तैरहं पूजितः सदा ॥
ब्रह्मज्ञानं गयाश्राद्धं गोग्र(गृ,)हे मरणं तथा ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा ॥
समुद्राः सरितः सर्व्वा वापी-कूप-ह्रदानि च ।
स्नातुकामा गयातीर्थं व्यास यान्ति न संशयः ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
पापं तत्सङ्गजं सर्व्वं गयाश्राद्धाद्विनश्यति ॥
असंस्कृता मृता ये च पशु-चौरहताश्च ये ।
सर्पदष्टा गयाश्राद्धान्मुक्ताः स्वर्गं व्रजन्ति ते ॥
गयायां पिण्डदानेन यत्फलं लभते नरः ।
न तच्छक्यं मया वक्तुं कल्पकोटिशतैरपि ॥

ब्रह्महत्येत्यादि—यस्य गयाश्राद्धं कृतं तस्य महापातकमपि नश्यतीत्यर्थः । असंस्कृता इत्यादि—

एते हि दुर्गतयो गयाश्राद्धात् सुगतयो भवन्तीत्यर्थः । गयायामित्यादि कर्त्तृगतमिदं फलम् ।

तथा कल्पतरौ वराहपुराणे—सनत्कुमार उवाच—

शृणुष्व वाक्यं नृपतिर्बभूव विशालनामा स पुरीं विशालाम् ।
उवास धन्यां द्युतिमानपुत्रः स्वयं विशालाधिपतिर्द्विजाग्रयान् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पप्रच्छ पुत्रार्थममित्रहन्ता तं ब्राह्मणाः प्रोचुरदीनसत्त्वाः ।
राजन् पितॄंस्तर्पय पुत्रहेतोर्गत्वा गयायां विधिवत्तु पिण्डैः ।
ध्रुवं सुतस्ते भविता नृवीर सहस्रदाता सकलक्षितीशः ॥
इतीरिते ब्राह्मणैः सम्प्रहृष्टो राजा विशालाधिपतिः प्रयत्नात् ।
समागतस्तीर्थवरं द्विजेश गयामिमां तद्गतमानसः सन् ॥
आगत्य सोऽथ प्रवरः[1] सुतार्थी गयाशिरो यागपरः पितॄणाम् ।
पिण्डप्रदानं विधिवत् प्रयच्छंस्तावद्वियत्युत्तममूर्त्तियुक्तान् ॥
पश्यन् स पुंसः सितरक्तकृष्णानुवाच राजा किमिदं भवद्भिः ।
समूह्यते शंसत सर्व्वमेव कुतूहलं मे मनसि प्रवृत्तम् ॥

सित उवाच—

अहं सितस्ते जनकोऽस्मि राजन् नाम्ना च वर्णेन च कर्म्मणा च ।
अयञ्च मे जनको रक्तवर्णो नृशंसकृद्ब्रह्महा पापकारी ॥
आन्ध्रेश्वरः शृणु परः पिताऽस्य कृष्णो नाम्ना कर्म्मणा वर्णतश्च ।
एतेन कृष्णेन हताः पुरा वै जन्मान्यनेकान्यृषयः पुराणाः ॥
एतौ मृतौ द्वावपि पितृ-पुत्राववीचिकं नरकं संप्रविष्टौ ।
आन्ध्रेश्वरोऽयं जनकः पुरोऽहं तत्कृष्ण-रक्तावपि दीर्घकालम् ।
अहञ्च शुद्धेन निजेन कर्म्मणा शक्रासनं प्राप्य सुदुर्लभं ततः ॥
त्वया पुनर्मन्त्रविदा गयायां पिण्डप्रदानेन बलादिमौ च ।
मोचायितौ तीर्थवरप्रसादादवीचिसंज्ञं नरकं गतौ तौ ॥

पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
प्रीणयामीति यत्तोयं त्वया दत्तमरिन्दम ॥

---

(१) ख पुस्तके प्रवरम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेनास्मद्युगपद्योगो[1] जातो वाक्येन सत्तम ! ।
तीर्थप्रभावाद्गच्छामः पितृलोकं न संशयः ॥
तव पिण्डप्रदानेन एतौ तव पितामहौ ।
दुर्गतावपि संसिद्धौ पापाद्विकृतलिङ्गकौ ॥
एतस्मात् कारणात् पुत्र अहमेतौ प्रगृह्य च ।
आगतोऽस्मि भवन्तं वै द्रष्टुं यास्यामि साम्प्रतम् ॥

तथा—

तीर्थप्रभावाद्यत्नेन ब्रह्मघ्नस्यापि सत्तम ।
पितुः पिण्डप्रदानेन कुर्य्यादुद्धरणं सुतः ॥

एवञ्च महापातकिनोऽपि श्राद्धोद्देश्यत्वात् गयाश्राद्धेन सद्गतिर्भवति कर्त्तुः पुत्रकामत्वे पुत्रोऽपि भवतीति प्रघट्टकतात्पर्य्यम् ।

पितॄनित्यादि—एवञ्च अमुकगोत्रः पिता अमुकदेवशर्म्मा तृप्यतामेतत्तिलोदकं तस्मै स्वधा पितरं प्रीणयामीति तर्पणवाक्यं कार्य्यम् ।

एवं पितामहादौ [2]राजतर्पणपर्य्यन्तं सर्व्वाञ्जलिषु प्रयोज्यम् ।

पितॄनिति बहुवचनं मूलेऽविवक्षितमिति सम्प्रदायः ।

तथा—सकृद्गयाभिगमनं सकृत्पिण्डप्रपातनम् ।
दुर्लभं किं पुनर्नित्यमस्मिन्नेव व्यवस्थितिः ॥

तत्रैव ब्रह्मपुराणे—

क्रियते पतितानान्तु गते संवत्सरे क्वचित् ।
देशधर्म्म-प्रमाणत्वाद्गयाकूपेषु बन्धुभिः ॥

---

(१) ग पुस्तके— योगः । (२) ख पुस्तके— बीज ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्रैव वामनपुराणे—

प्रेतराजोऽथ वणिजं कश्चित्प्राह सुमुक्तये।
गयायां तीर्थजुष्टायां स्नात्वा [1]शौचसमन्वितः॥
मम नाम समुद्दिश्य पिण्डनिर्वपणं कुरु।
तत्र पिण्डप्रदानेन प्रेतभावादहं सुखम्॥
मुक्तस्तु [2]सर्व्वदातॄणां प्राप्स्यामि शुभलोकताम्।
इत्येवमुक्त्वा वणिजं प्रेतराजोऽनुजैः[3] सह॥
स्वनामानि यथान्यायं सम्यगाख्यातवान् रहः।
उपार्ज्जयित्वा प्रययौ गयाशिरसमुत्तमम्॥
पिण्डनिर्वपणं तत्र प्रेतानामनुपूर्व्वशः।
चकार वसुदायः स्वान् पितॄंश्चक्रे[4] त्वनन्तरम्॥
आत्मनश्च महाबुद्धिर्महाबोधौ तिलैर्विना।
पिण्डनिर्वपणं चक्रे तथाऽन्यानपि [5]गोत्रजान्।
एवं दत्तेषु पिण्डेषु वणिजा प्रेतभावतः॥
विमुक्तास्ते द्विज प्रेता ब्रह्मलोकं ततो गताः॥

गयाशिरसमिति--एवञ्च गयाशिरसि प्रेताय पिण्डे दत्ते तस्य प्रेतत्वविमुक्ति-ब्रह्मलोकावाप्ती-भवत इति।

आत्मन इति स्वपिण्डदानम्। पिण्डदानं सव्येनैव--

मन्त्रेण चात्मनोऽन्येषां सव्येनापि तिलैर्विना।

---

(१) मूले—तिल—।
(२) ख पुस्तके—नृणाम्। ग पुस्तके सर्व्वदान्द्वयम्। (४) मूले महावेद्याम्।
(३) मूले गणैः। (५) मूले तथान्येषाञ्च गोत्रिणाम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति वायुपुराणात्। तथा—

आनन्त्याय भवेद्दत्तं खड्गिमांसं पितृक्षये।
कृष्णो लोहस्तथा छाग आनन्त्याय प्रकल्पते॥
गयायामक्षयं श्राद्धं जप-होम-तपांसि च।
पितृक्षयो हि तत्पुत्र तेन तत्राक्षयं भवेत्॥

बृहस्पतिः—

काङ्क्षन्ति पितरः पुत्रान् नरकाद्भयभीरवः।
गयां यास्यति यः पुत्रः सोऽस्मान् सन्तारयिष्यति॥
गयायां धर्म्मपृष्ठे च सदसि ब्रह्मणस्तथा।
गयाशीर्षेऽक्षयवटे पितृणां दत्तमक्षयम्॥
ब्रह्मारण्यं धर्म्मपृष्ठं धेनुकारण्यमेव च।
दृष्ट्वैतानि पितॄंश्चार्च्चेत्र वंशान् विंशतिमुद्धरेत्॥

वायुपुराणे—

महाकल्पकृतं पापं गयां प्राप्य विनश्यति।

तथा—गयायां धर्म्मपृष्ठे च सदसि ब्रह्मणस्तथा।
गवि गृध्रवटे चैव श्राद्धं दत्तं महाफलम्॥
भरतस्याश्रमे पुण्ये नित्यं पुण्यतमैर्वृते।
मतङ्गस्य पदं तत्र दृश्यते सर्व्वमानुषैः॥
ख्यापितं धर्म्मसर्व्वस्वं लोकस्यास्य निदर्शनात्।
तत्पङ्कजवनं पुण्यं पुण्यकृद्भिर्निषेवितम्॥
यस्मिन् पाण्डुविशल्येव तीर्थं सर्व्वनिदर्शनम्।
तृतीयायां तथा पादे निःक्षीरायाश्च मण्डले॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महाह्रदे च कौशिक्यां दत्तं श्राद्धं महाफलम्।
मुण्डपृष्ठे पदं न्यस्तं महादेवेन धीमता॥
बहुवर्षशतं[1] तप्तं तपस्तीर्थेषु दुष्करम्।
अल्पेनाप्यत्र कालेन नरो धर्म्मपरायणः॥
पाप्मानमुत्सृजत्याशु जीर्णां त्वचमिवोरगः।
नाम्ना [2]कणखलन्देवतीर्थं जगति विश्रुतम्॥
उदीच्यां मुण्डपृष्ठस्य ब्रह्मर्षिगणसेवितम्।
तत्र स्नात्वा दिवं यान्ति स्वशरीरेण मानवाः॥
दत्तञ्चापि सदा श्राद्धमक्षय्यं समुदाहृतम्।
स्नात्वा दिनत्रयं तत्र निःक्षीरायां द्विजोत्तमः॥
मानसे सरसि स्नात्वा श्राद्धं निर्वर्त्तयेन्नरः।

मानसे दक्षिणमानसे।

उत्तरं मानसं गत्वा सिद्धिं प्राप्नोत्यनुत्तमाम्॥
तस्मिन्निर्वर्त्तयेच्छ्राद्धं यथाशक्ति यथाबलम्।
कामान् स लभते दिव्यान् मोक्षोपायांश्च कृत्स्नशः॥

एवञ्च—मुण्डपृष्ठोदीचीसंस्थायां निःक्षीरायां दिनत्रयं स्नात्वा दक्षिणमानसे श्राद्धं कृत्वा उत्तरमानसे तत्कार्य्यमिति वक्तुस्तात्पर्य्यार्थः।

वायुपुराणान्तरे तु यदेतद्विपरीतमुक्तं तत्कल्पान्तरम्।

महाभारते पुलस्त्यतीर्थयात्रायाम्—

ततो गयां समागत्य ब्रह्मचारी जितेन्द्रियः।
अश्वमेधमवाप्नोति गमनादेव भारत॥

---

(१) ख पुस्तके बहून् वर्षशतान्। (२) ख पुस्तके कनकनन्देति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्राक्षयवटो नाम त्रिषु लोकेषु विश्रुतः ।
यत्र दत्तं पितृभ्यस्तु भवत्यक्षयमित्युत ॥
महानद्यामुपस्पृश्य तर्पयेत् पितृदेवताः ।
तेनाक्षयान् पितॄन् लोकान् कुलञ्चैव समुद्धरेत् ॥
ततो ब्रह्मसरो गच्छेद्‌ब्रह्मारण्योपशोभितम् ।
ब्रह्मलोकमवाप्नोति प्रभातामिव शर्व्वरीम् ॥
ब्रह्मणा तत्र सरसि यूपः पुण्यः प्रकल्पितः ।
यूपं प्रदक्षिणं कृत्वा वाजपेयफलं लभेत् ॥
ततो गच्छेत राजेन्द्र धेनुकं लोकविश्रुतम् ।
एकरात्रोषितो यत्र प्रयच्छेत्तिलधेनुकाम् ॥
सर्व्वपापविमुक्तात्मा सोमलोकं व्रजेद्ध्रुवम् ।
तत्र चिह्नं महाराज अद्यापि महदद्भुतम् ॥
कपिला सहवत्सा वै पर्व्वते विचरत्युत ।
सवत्सायाः पदानि स्म दृश्यन्तेऽद्यापि तत्र वै ॥
तेषु तेषु तु राजेन्द्र पदेषु नृपसत्तम ।
यत्किञ्चिदशुभं कर्म्म तत्प्रणश्यति भारत ॥
ततो गृध्रवटं गच्छेत् स्थानं देवस्य धीमतः ।
स्नायीत (?) भस्मना तत्र अभिगम्य वृषध्वजम् ॥
ब्राह्मणानां भवेद्वीर व्रतं द्वादशवार्षिकम् ।
इतरेषान्तु वर्णानां सर्व्वं पापं प्रणश्यति ॥
उद्यन्तञ्च ततो गच्छेत् पर्व्वतं गीतनादितम् ।
सावित्र्यास्तु पदं तत्र दृश्यते भरतर्षभ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र सन्ध्यामुपासीत ब्राह्मणः संशितव्रतः।
उपासीना भवेत् सन्ध्या तेन द्वादशवार्षिकी॥
योनिद्वारञ्च तत्रैव विद्यते भरतर्षभ।
तत्राभिगम्य मुच्येत पुरुषो योनिसङ्कटात्॥
शुक्ल कृष्णावुभौ पक्षौ गयायां यो वसेन्नृपः।
पुनात्यासप्तमञ्चैव कुलान्यत्र न संशयः॥
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
ततः फल्गुं व्रजेद्राजन् तीर्थसेवी नराधिपः।
अश्वमेधमवाप्नोति सिद्धिञ्च परमां लभेत्॥
ततो गच्छेत राजेन्द्र धर्म्मपृष्ठं महाफलम्।
तत्र धर्म्मो महाराज नित्यमास्ते युधिष्ठिर॥
अभिगम्य ततस्तत्र वाजिमेधफलं लभेत्।
ततो गच्छेत राजेन्द्र ब्रह्मणस्तीर्थमुत्तमम्॥
तत्राधिगम्य राजेन्द्र ब्रह्माणं भरतर्षभ।
राजसूयाश्वमेधाभ्यां फलमाप्नोति मानवः॥

महानदी-ब्रह्मसरो-धेनुक-गृध्रवटोद्यन्त-धर्म्मपृष्ठ-ब्रह्मतीर्थानां सप्तानां क्रमेण गमनं कार्य्यमिति प्रघट्टकार्थः।

तथा धौम्यतीर्थयात्रायाम्—

पूर्व्वं प्राचीदिशं राजन् राजर्षिगणसेविताम्।
रम्यां ते कथयिष्यामि युधिष्ठिर यथास्मृति॥
यस्यां गिरिवरः पुण्यो गयो राजर्षिसत्कृतः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शिवं ब्रह्मसरो यत्र सेवितं त्रिदशर्षिभिः ॥
यदर्थं पुरुषव्याघ्र कीर्त्तयन्ति पुरा स्मृतीः ।
एष्टव्याः बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ॥
उत्तारयति सन्तमान् दशपूर्व्वान् दशावरान् ।
महानदी [1]महादेवस्तथा गयशिरो नृप ॥
यत्रासौ कीर्त्त्यते विप्रैरक्षय्यकरणो वटः ।
तत्र दत्तं पितृभ्योऽन्नमक्षयं भवति प्रभो ॥
सा च पुण्यजला तत्र फल्गुनामा महानदी ।
बहुमूलफला चापि कौशिकी भरतर्षभ ॥

तथा लोमशतीर्थयात्रायां—

ततो महीधरं जग्मुर्धर्म्मज्ञेनाभिरक्षितम् ।
राजर्षिणा पुण्यकृता गयेनाप्युपयुज्यते ।
सरो गयशिरो यत्र पुण्या चैव महानदी ॥
ऋषिजुष्टं महापुण्यं तीर्थं ब्रह्मसरोरुहम् ॥
अगस्त्यो यत्र भगवान् गतो वैवस्वतं प्रति ।
उवास सततं यत्र धर्म्मराजः[2] सनातनः ॥
सर्व्वासां सरितां यत्र समुद्भेदो विशां पते ।
यत्र सन्निहितो नित्यं महादेवः पिणाकधृक् ॥
तत्र ते पाण्डवा वीराश्चातुर्मास्यैस्तदेजिरे ।
ऋषियज्ञेन महता यः सोऽक्षय्यवटो महान् ॥

---

(१) क ख पुस्तकद्वये ब्रह्मतीर्थम् । (२) क पुस्तके धर्म्मो राजा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र बलभद्रतीर्थयात्रायाम्—

गजस्य यजमानस्य गयस्येव महाक्रतुः।
आहूता तु सरिच्छ्रेष्ठा गययज्ञे सरस्वती।
विशालान्तु गयेष्वाहुर्ऋषयः संशितव्रताः॥

गयस्येति-गजयज्ञस्य तेनैवोपमानमिति प्रशंसार्थम्।

तत्राङ्गिरसयात्रायाम्—

मुण्डपृष्ठं गयाञ्चैव नैर्ऋतं देवपर्व्वतम्।
तृतीयां क्रौञ्चपादीञ्च ब्रह्महत्या विमुच्यते॥

वामनपुराणे—प्रह्लादयात्रायाम्—

गयायां गोपतिं द्रष्टुं स जगाम महासुरः।
सरसि ब्रह्मणः स्नात्वा गत्वा चास्य प्रदक्षिणम्॥
पिण्डनिवर्पणं पुण्यं पितॄणां स चकार ह।

नरसिंहपुराणे—

शिवनद्यां शिवकरं गयायाञ्च जनार्द्दनम्।
सर्व्वत्र परमात्मानं यः पश्यति स मुच्यते॥
शिवनदी विहारनगरोपपण्ठेऽस्ति।

मत्स्यपुराणे—

गौरीस्नानप्रतिपादनप्रस्तावे च—

वाराणस्यां विशालाक्षी प्रयागे ललिता तथा।
गयायां मङ्गला नाम कृतशौचेति सैंहिका॥

याज्ञवल्क्यः—

यद्ददाति गयास्थश्च सर्व्वमानन्त्यमश्नुते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ।
गयाशीर्षे वटे श्राद्धं यो नः कुर्य्यात् समाहितः ॥

यमः—

एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः ।
तेषां वै समवेतानां यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥

वशिष्ठः—

नन्दन्ति पितरस्तेन सुवृष्टेनेव कर्षकाः ।
यद्गयास्थो ददात्यन्नं पितरस्तेन पुत्रिणः ॥

इति कल्पतरौ तीर्थकाण्डे गयामाहात्म्यम् ।

प्रेतशिलाकृत्ये वायुपुराणम्—

आच्छादितशिलापादः प्रभासेनाद्रिणा ततः ।
प्रभासो मुनिभिर्वृष्टः[1] शिलाङ्गुष्ठो विनिर्गतः ॥
अङ्गुष्ठस्थित ईशोऽपि प्रभासेशः प्रकीर्त्तितः ।
शिलाङ्गुष्ठैकदेशो यः सा च प्रेतशिला स्थिता ॥
पिण्डदानाद्यतस्तस्यां प्रेतत्वान्मुच्यते नरः ।
महानदी-प्रभासाद्योः सङ्गमे स्नानकृन्नरः ॥
रामो देव्या सह स्नातो रामतीर्थं ततः स्मृतम् ।
प्रार्थितोऽथ महानद्या राम स्नातो भवान् यदि ॥

---

(१) क ख पुस्तकद्वये दृष्टः । मूलपुस्तके प्रभासं हि विनिर्भिद्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रामतीर्थं भवत्वत्र सर्व्वलोकेषु पावनम्।
जन्मान्तरशतं साग्रं यत्कृतं दुष्कृतं मया॥
तत्सर्व्वं विलयं यातु रामतीर्थाभिषेचनात्।
मन्त्रेणानेन यः स्नात्वा श्राद्धं कुर्व्वीत मानवः॥
रामतीर्थे पिण्डदस्तु विष्णुलोकं प्रयात्यसौ।
तथेत्युक्ता स्थितो रामः सीतया भरताश्रमे॥
रामतीर्थे नरः स्नात्वा मन्त्रैः पिण्डप्रदो भवेत्।
प्रेतत्वात्तस्य पितरो विमुक्ताः पितृतां ययुः॥

रामेत्यादि पूर्व्ववत्।

नमस्कृत्य प्रभासेशं भासमानः शिवं व्रजेत्।

तथा—

आगत्य च[1] नमस्कृत्य कुर्य्याद्याम्यबलिन्ततः।
आपस्त्वमसि देवेश ज्योतिषां पतिरेव च॥
पापं नाशय देवेश मनो-वाक्काय-कर्म्मजम्।
शिलायां जघनं भूयः समाक्रान्तं नगेन च॥
धर्म्मराजेनाद्रिरुक्तो न गच्छेति नगः स्मृतः।
यमराज-धर्म्मराजौ निश्चयेनेरीतौ स्मृतौ॥
ताभ्यां बलिमकृत्वा स्यान्नयाश्राद्धमसार्थकम्॥
श्वानौ द्वौ श्याव-शवलौ वैवस्वतकुलोद्भवौ।
ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ॥

आच्छादित इति—शिलायाः प्रेतशिलायाः पादः प्रभासनाम-

(१) क ख पुस्तकद्वये तत्र शम्भुम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केनाद्रिणाच्छादितः । तत्र प्रभासशिलाङ्गुष्ठो हि निर्गतः । तदङ्गुष्ठस्थित ईशोऽपि प्रभासेशस्तच्छिलाङ्गुष्ठैकदेशो यः प्रभासेशसहितः सैव प्रेतशिला तस्यां यदीयः पिण्डो दीयते तस्य प्रेतत्वविमुक्तिर्भवतीति वर्त्तुलार्थः ।

महानदीति—महानदी-प्रभासाद्र्योः सङ्गमे स्नानङ्कृदपि प्रेतत्वान्मुच्यते इत्यर्थः ।

जन्मान्तरेति—अनेन मन्त्रेण स्नात्वा य इह रामेशसन्निधाने पिण्डं श्राद्धं वा करोति स विष्णुलोकं गच्छतीत्यर्थः ।

राम रामेति—

राम राम महाबाहो देवानामभयङ्कर ।
[१]त्वाऽनुगम्येऽत्र देवेशं मम नश्यतु पातकम् ॥

इति रामो नमस्कार्य्य इत्यर्थः ।

पिण्डप्रद इति—पित्रादिप्रेतत्वविमुक्त्यनन्तरतत्तत्पितृत्वप्राप्तिकामेन तत्र पित्रादिपिण्डदानं कर्त्तव्यमित्यर्थः ।

नमस्कृत्येति—भासमानात्मकर्त्तृकशिवव्रजनकामनया प्रभासेशनमस्कारः कार्य्य इत्यर्थः ।

तच्चेति—तं रामं च समुच्चये तेन पुनरपि राम-प्रभासेशौ नमस्कार्य्यावित्यर्थः ।

याम्यबलिमिति—ततः प्रभासपर्व्वते—

आपस्त्वमसि देवेश ज्योतिषाम्पतिरेव च ।
पापं नाशय देवेश मनोवाक्कायकर्म्मजम् ॥

---

(१) क पुस्तके त्वां नमस्येऽहं देवेश ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति पठित्वा यमायैष बलिर्नम इति कुशजलैर्देय इत्यर्थः । शिलायामित्यस्यां प्रेतशिलायां जघनमङ्गं[1] नगनाम्ना पर्व्वतेन समाक्रान्तं तस्य च नगनामपर्व्वतस्य स्थिरीकरणाय तदुपरि यमराजश्वमराजौ स्थापितौ ।

अतः प्रेतशिलादक्षिणभागस्थतज्जघनस्थे नगनाम्नि पर्व्वते गयाश्राद्धसाफल्यकामनया श्वानौ द्वौ इति श्लोकद्वयं पठित्वा यमराज-श्वमराजाभ्यामेष बलिर्नम इति ताभ्यामेको बलिर्देय इति ।

एतदन्तम्[2] प्रथमदिनकृत्यम् ।

प्रेतत्वविमोचकप्रेतशिलाश्राद्धपरिकरत्वादिति । स्नात्वेति-भरताश्रमे महानद्यां स्नात्वा रामेशं रामं सीताञ्च दृष्ट्वा नत्वा राम राम महावाहो इति पठेदित्यर्थः । अत्र प्रथमदिने प्रेतशिलाकर्म्म सकलदेशीयशिष्टाचारात् ।

तीर्थे प्रेतशिलादौ च चरुणा सघृतेन च ।
पितृणावाह्य तेभ्यश्च मन्त्रैः पिण्डांस्तु निर्वपेत् ॥

इति वायुपुराणे प्रेतशिलायाः प्रथमोल्लेखाच्चेति ।

एतच्च प्रेतपर्व्वतोक्तेतिकर्त्तव्यतया करणीयम् ।

सर्व्वस्थानेषु चैवं स्यात् पिण्डदानन्तु नारद ।

इति वायुपुराणवचनेन तदितिकर्त्तव्यतातिदेशात् ।

---

(१) क पुस्तके मध्याङ्गम् । (२) ग पुस्तके एतदनन्तरम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथाच प्रेतपर्व्वतकृत्ये वायुपुराणम्--

कृत्वात्मानं पितॄणान्तु प्रयतः प्रेतपर्व्वते ।
प्राचीनावीतिना भाव्यं दक्षिणाभिमुखः स्मरेत् ॥
कव्यवालोऽनलः सोमो यमश्चैवार्य्यमा तथा ।
अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः ॥
आगच्छन्तु महाभागा युष्माभी रक्षितास्त्विह ।
मदीयाः पितरो ये च कुले जाताः सनाभयः ॥
तेषां पिण्डप्रदानार्थमागतोऽस्मि गयामिमाम् ।
ते सर्व्वे तृप्तिमायान्तु श्राद्धेनानेन शाश्वतीम् ॥
आचम्योत्थाय पश्चाद्धि प्राणानायम्य यत्नतः[1] ।
पुनरावृत्तिरहितब्रह्मलोकाप्तिहेतवे ।
एवं संकल्प्य विधिवच्छ्राद्धं कुर्य्याद्यथाक्रमम् ।
पितॄणावाह्य चाभ्यर्च्य मन्त्रैः पिण्डप्रदो भवेत् ।
तीर्थे प्रेतशिलादौ च चरुणा सघृतेन च[2] ।
प्रक्षाल्य पूर्व्वं तत् स्थानं पञ्चगव्यैः पृथक् पृथक् ॥

तथा--

दत्त्वा श्राद्धं सपिण्डानां तेषां दक्षिणभागतः ।
कुशैरास्तीर्य्य तेषान्तु सकृद्दत्त्वा तिलोदकम् ॥
गृहीत्वाञ्जलिना तेभ्यः पितृतीर्थेन यत्नतः ।
शक्तुना मुष्टिमात्रेण दद्यादक्षय्यपिण्डकम् ॥

---

(१) मूले प्राणायामं प्रयत्नतः । (२) मूले वा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तिलाज्यदधिमध्वादि पिण्डद्रव्येषु योजयेत्।
सम्बन्धिनस्तिलाङ्गिंश्च कुशेष्वावाहयेत्ततः।
एतांस्तु सर्व्वमन्त्रांश्च स्त्रीलिङ्गान्तान् समूह्य च।
पिण्डान् दद्याद्यथापूर्व्वं पितॄणावाह्य पूर्व्ववत्॥
स्वगोत्रे परगोत्रे वा दम्पत्योः पिण्डपातने।
अपृथङ्निष्फलं श्राद्धं पिण्डञ्चोदकतर्पणम्॥
पिण्डपात्रे तिलं दत्त्वा पूरयित्वा शुभोदकैः।
मन्त्रेणानेन पिण्डांस्तान् प्रदक्षिणकरं यथा॥
परिषिचयेत्त्रिधा सर्व्वान् प्रणिपत्य क्षमापयेत्।
पितॄन् विसृज्य चाचम्य साक्षिणः श्रावयेत् सुरान्।
सर्व्वस्थानेषु चैवं स्यात् पिण्डदानन्तु नारद॥ इति।

कृत्वात्मानमिति--प्रक्षालितपाणिपाद आचान्तः कृताप-सव्यो दक्षिणामुखः कव्यवाल इत्यादि शाश्वतमित्यन्तं मन्त्रं पठित्वा पित्रावाहनरूपं पठेदित्यर्थः।

आचम्येति सव्येनाचम्य--ॐकारव्याहृतिसप्तकगायत्री शिर ॐकाररूपकपञ्चाङ्गजपसहितान् सन्ध्यावन्दनवत्पूरक-कुम्भक-रेचक-प्राणायामान् कुर्य्यादित्यर्थः।

सर्व्वस्थानेष्विति--उपदेशविषये सर्व्वत्रेयमितिकर्त्तव्यताऽति-देशात्सिद्धेत्यर्थः।

वायव्ये--

गयायां सर्व्वकालेषु पिण्डं दद्याद्विचक्षणः।
अधिमासे जन्मदिने अस्ते च गुरु-शुक्रयोः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न त्यजेत गयाश्राद्धं सिंहस्थेऽपि बृहस्पती ।
दर्भं प्रदर्शयेद्विद्वान् गयां गत्वा न पिण्डदः ॥
न्यस्य विष्णुपदे दर्भं मुच्यते पितृभिः सह ॥
पायसेन गयायाञ्च शक्तुना पिष्टकेन वा ।
चरुणा तण्डुलाद्यैर्वा पिण्डदानं विधीयते ॥

मुण्डपृष्ठशिलामधिकृत्य तत्रैव—

तां दृष्ट्वा सर्व्वलोकस्य महापापोऽतिपातकी ।
पूतः कृत्याधिकारी च श्राद्धकृद्ब्रह्मलोकभाक् ॥

तदयमनुष्ठानक्रमः—

प्रथमदिनेऽश्वमेधसहस्रजन्यफलविलक्षणफलप्राप्तिकामः फल्गुतीर्थे स्नानमहं करिष्ये । इति संकल्प्य स्नायात् ।

तदुक्तं स्नानाधिकारे वायुपुराणे—

अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ।
नासौ न तत्फलमाप्नोति फल्गुतीर्थे यदाप्नुयात् ॥ इति ।

तर्पणन्तु—ॐ अद्यामुकगोत्रोऽस्मत्पिता अमुकदेवशर्म्मा तृप्यतामिदं तिलोदकं तस्मै स्वधा पितरं प्रीणयामीति ।

तदुक्तं कल्पतरौ वराहपुराणे—

प्रीणयामीति यत्तोयं त्वया दत्तमरिन्दम ।
तेनास्मद्युगपद्योगो जातो वाक्येन सत्तम ॥ इति ।

स्वधोदीरणानन्तरञ्च पितरं प्रीणयामीति योज्यमागन्तुकानामन्तेऽभिनिवेशात् ।

ततो देवार्च्चनादि कृत्वा अद्य तीर्थप्राप्तिनिमित्तकपार्व्वणश्राद्ध-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महं करिष्ये इति संकल्प्यार्घ्यावाहनरहितं खगृह्योक्तरीत्या पार्व्वणं कुर्य्यात्। तदसम्भवे पिण्डदानमपि तद्रीत्यैव कार्य्यम्।

पिण्डदानं ततः शस्तं पितृणाञ्चातिदुर्लभम्।
विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत्॥

इति वचनात्।

ततस्तद्दिन एव महानदीपश्चिमकूललग्नां गयोत्तरस्थां प्रेत-शिलां गत्वा तत्कर्म्म कर्त्तव्यम्।

तद्यथा—

प्रेतशिलायां कृतपञ्चभूसंस्कारायाम् आचान्त उपविश्य कृताप-सव्यो दक्षिणामुखो भूत्वा ॐ कव्यवाल इत्यादि शाश्वतीमित्यन्तं पठित्वा सव्यं कृत्वा आचम्य सन्ध्यावन्दनवत्प्राणायामान् कृत्वा पुण्डरीकाक्षस्मरणेन श्राद्धीयद्रव्याणि कुशोदकेन प्रोक्ष्य--ॐ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकामुकदेव-शर्म्मणाम् अमुकगोत्राणां मातृ-पितामही-प्रपितामहीनाम् अमु-कामुकदेवीनाममुकगोत्राणां मातामह–प्रमातामह–वृद्धप्रमाता-महानाममुकामुकदेवशर्म्मणाम् अमुकगोत्राणां मातामही-प्रमातामही वृद्धप्रमातामहीनाममुकामुकदेवीनां प्रेतत्वविमुक्ति-कामः प्रेतशिलायां श्राद्धमहं करिष्ये।

इति संकल्प्य द्वादशदैवतं श्राद्धं पार्व्वणेतिकर्त्तव्यताकं कुर्य्यात्।

हेमाद्रिमते तु मातामह्यादिवर्ज्जं शेषं पूर्व्ववत्। जयशर्म्मादि-मते प्रकृतमेव पार्व्वणं किन्तु सपत्नीकत्वेन षण्णामपि देवता-त्वमिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्प्रदायमते षण्णां पुंसामिह देवतात्वं न तु स्त्रीणामिति न च सपत्नीकत्वेनापीति। उभयमतमप्यसत्।

अन्वष्टकायां वृद्धौ च गयायाञ्च मृताहनि।
मातृश्राद्धं पृथक् कुर्य्यादन्यत्र पतिना सह॥

इति वायुपुराणविरोधादिति।

एवं दक्षिणादानान्तं पार्व्वणं विधाय तद्वेदिदक्षिणत उपविश्य कृतापसव्यो दक्षिणामुखः कुशत्रयं धृत्वा कव्यालोऽनल इत्यादि-शाश्वतीमित्यन्तं पठित्वा तेषु कुशेषु सकृत्तिलोदकाञ्जलिरूप-मावाहनं कुर्य्यात्।

तत एतानि पाद्यादीनि ॐ पित्रादिभ्यो नम इति क्रमेण पञ्चोपचारेण पित्रादीन् सम्पूज्य—

ॐ आब्रह्मस्तम्बपर्य्यन्तं देवर्षि-पितृ-मानवाः।
तृप्यन्तु पितरः सर्व्वे मातृ-मातामहादयः॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्॥

इति पूर्व्ववदञ्जलिदानरूपमिलितपित्राद्यावाहनं कृत्वा ॐ अद्यामुकगोत्र पितरमुकदेवशर्म्मन्नेष ते पिण्डः स्वधेति [1]मधुतिलमिश्रं पायसाद्यन्यतमपिण्डं पित्रे एवं पितामहादिभ्य एकादशभ्योऽपि यथादक्षिणं दद्यात्। ततस्तद्दक्षिणत उपविश्य समूलान् दक्षि-णाग्रान् कुशानास्तीर्य्य ॐ कव्यवाल इत्यादि शाश्वतीमित्यन्तं पूर्व्ववत्पठित्वा सकृत्तिलोदकदानरूपमावाहनं कृत्वा पूर्व्ववदभ्यर्च्चेत्र

(१) ग पुस्तके जलमधुमिश्रम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

•Markandeya Purana, Fasc. 5-7 @ /10/ each	Rs.	1	14
*Mīmāṁsā Darçana, Fasc. 10-19 @ /10/ each		6	4
Nyāyavārtika, Fasc. 1--6 @ /10/ each		3	12
*Nirukta, Vol. IV. fasc. 1-8 @ /10/ each		5	0
*Nitisara, Fasc. 3-5 @ /10/ each		1	14
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each		4	6
Nityācārapradīpaḥ Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-3. @ /10/ each		6	14
Nyayabinduṭīkā, Fasc. 1 @ /10/ each		0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--3 @ /10/ each		5	0
Nyayasaraḥ		2	0
Padumawati, Fasc. 1--5 @ 2/		10	0
*Pariçiṣṭa Parvan, Fasc. 3--5 @ /10/ each		1	14
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each		4	6
Prithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each		3	2
Ditto (English) Part II, Fasc. 1 @ 1/-		1	0
Prākrta Lakṣaṇam Fasc. 1 @ 1/8/ each		1	8
Parāçara Smṛti, Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol III, Fasc. 1--6 @ /10/ each		12	8
Parāçara, Institutes of (English) @ 1/- each		1	0
Pariksamukha Sutram		1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each		3	12
Rasarnavam, Fasc. 1-3		3	12
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each		1	4
Samaraicca Kaha Fasc. 1-3, @ /10/		1	14
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each		2	8
Ditto (English) Fasc. 1-3 @ 1/- each		3	0
•Sankara Vijaya, Fasc. 2-3 @ /10/ each		1	4
Six Buddhist Nyaya Tracts.		0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each		3	12
Sragdharā Stotra (Sanskrit and Tibetan)		2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each		1	0
Suddhikaumudī, Fasc 1-4 @ /10/ each		2	8
Sundarañandam Kavyam		1	0
Suryya Siddhanta fasc. 1		1	4
Syainika Sastra		1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each		9	6
,, Pratisakhya, Fasc. 1-3 @ /10/ each		1	4
*Taitterīya Saṁhitā, Fasc. 27–45 @ /10/ each		11	14
Tāṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each		6	14
Tantra Vārteka (English) Fasc. 1-8 @ 1/4/ each		10	0
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9, Vol II, Fasc 1-10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each		24	6
Tattva Cintamani Didhiti Vivriti, Fasc, 1, @ /10/ each		0	0
Ditto Prakas, fasc. 1-2, @ /10/ each		1	4
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each		1	14
Tirthacintamoni, fasc, 1, @ /10/ each		0	10
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each		1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each		3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each		6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each		6	0
Vallāla Carita, Fasc 1 @ /10/		0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each		3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each		6	14
Vidhāna Pārijata, Fasc. 1-8 Vol- II, Fasc. 1 @ /10/ each		5	10
Ditto Vol. II, Fasc. 2-4 @ 1/4/		3	12
Vivādaratnākara, Fasc. 1--7 @ /10/ each		4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each		3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each		1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1-3		3	12

Tibetan Series.

Baudhyastotrasangraha, Vol. I (Tib. & Sans.)		2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each		4	0
Nyayabindu of Dharmakirti, Fasc. 1		1	0
Pag-Sam S'hi Ṭiṅ, Fasc. 1--4 @ 1/- each		4	0
Rtogs *brjod dpag hkhri* S'iṅ (Tib. & Sans.. Avadāna Kalpala Vol. I, Fasc. 1--8 ; Vol. II. Fasc. 1--7 @ 1/- each		15	0
Sher-Phyin, Vol. I, Fasc 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1 6, @ 1/ each		14	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1--13 @ /10/ each		8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each		4	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each		55	8

*The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	Rs.	As.
Āin-l-Akbarī, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) [illegible]	36	0
Ditto (English) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-7 Vol 3 @ 1/4/ each	20	0
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc. 1--19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	Rs. 5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farnang-i-Rashīdī, Fasc. 1-14 @ 1/8/ each	21	0
Fih rist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each	4	0
Futūḥ-ush-Shām of Wāqidī, Fasc. 1--9 @ /10/ each	5	10
Ditto of Āzādī, Fasc. 1--4 @ /10/ each	2	8
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each	0	12
History of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each	7	8
Iqālnamah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'ṣāir-i- Ālamgīrī, Fasc. 1--6 @ /10/ each	3	12
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each	3	2
Marhamu 'L-Ilali 'L-Mu'Dila	1	0
Muntakhabu-t Tawārīkh, Fasc. 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each	16	0
Muntakhabu-l-Lubāb, Fasc. 1--19 @ /10/ each	11	14
Ditto Part 3, Fasc. 1	1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmi's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāẓu-s-Salātīn, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Tadhkira-i-khushnavīsān	1	0
Tabaquāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni Fasc. 1--7 @ /10/ each	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/ each	3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngīrī, (Eng) Fasc. 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XIX and XX @ 10/ each ... 20
2. Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. Journal of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10, 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9). 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each ... 18 0
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ ... 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each ... 34 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer, Asiatic Society," only.

Books are supplied by V. P. P.

20-9-11.